प्रवेश सं० 

विषयः वेद

क्रम सं०

नाम आपस्तम्बीय श्रौतसूत्र

ग्रन्थकार कपर्दी स्वामी

पत्र सं० 1-48

अक्षर सं० (पंक्तौ) 35

पंक्ति सं० (पृष्ठे) 9

श्लोक सं०

लिपिः दे. ना.

आधारः का.

आकारः 26.5 X 5.2

वि० विवरणम्

319869

पी० एस० यू० पी०—९७ एस० सी० ई०—१९४२—५० ०००

004303

Indira Gandhi National Centre for the Arts

वे. २६ स. प्र. ४० धर्मा

पुस्तक

॥अथशुल्वभाष्यकपर्दिस्वामी॥

Indira Gandhi National
Centre for the Arts

शु॰ कर्क॰ ॥ श्रीगणेशाय नमः ॥ उक्ता यज्ञास्तेषामायतनानि नियतप्रमाणानि नियतदेशानि तेषामा
१ यामविस्तारानुवक्तुकाम आह ॥ विहारयोगान्व्याख्यास्यामः ॥ विह्रियंतेऽस्मिन्नग्नय इति विहाराः
प्राग्वंशादयः गार्हपत्यादयश्च युज्यतेऽनेनेति योगो रज्जुविशेषः ॥ विहाराणां योगो विहारयोगः ॥
विहारसंपादनार्थान् रज्जुविशेषान् व्याख्यास्यामः ॥ प्रतिपादयामः ॥ अथवा आयामादीनां विहर
णमेव विहारस्तेषां योगो विहारयोगः सम्यक् संपादनमित्यर्थः ॥ योग इति बहुवचनं ॥ बहुभिः प्रका
रैर्दर्शयितुं ॥ दर्शनं च प्राधान्यप्रतिपत्त्यर्थं ॥ यथा रथ्यादयो नियतांगप्रमाणा एकस्मिन्नंगेऽपि मात्रया
हीयमाने सम्यक् न गच्छंति ॥ एवमन्यायतनादीन्यपि मात्रयाहीनानि साधनभावं न गच्छंति ॥ तस्मा
द्यत्नेन संपादनीयानि ॥ सर्वत्र विज्ञायत इति श्रुतीनामुपन्यासात् सर्वथा आयामादय उक्तैरेव मार्गैः
सम्यक् संपादनीयाः ॥ आयतनानां भ्रेषे च प्रायश्चित्तेन भवितव्यं ॥ अमुमेवार्थं पृथक् दर्शयितुं श्रु
त्यंतरे अथातः शब्दौ प्रयुंक्ते ॥ अथातो विहारयोगानिति ॥ आदित एव दिशां ग्रहणं वक्तव्यं ॥ अनेन
आचार्येण नोक्तं ॥ कल्पांतरतो ग्राह्यं ॥ कृत्तिकाः खल्विमां प्राचीं दिशं न पराजहतीसारासांदर्शनेन प्राप्ये १

दिसेकं ॥ श्रोणासंदर्शनेन प्राप्ये दिसेकं ॥ चित्रास्वात्योरंतरेणेत्यपरं मतं भगवता बौधायनेन प्राग्वंशमान
मधिकृत्योक्तं ॥ कृत्तिकादयो यत्र निलीयंते सा प्राची दिगिति चित्रास्वात्योर्मध्यमुदकमवस्थाप्य प्रतिबिंबद
ष्ट्या ग्राह्यं ॥ अथवा यत्रैव यजनं तत्र जलेन देशं समीकृत्य मध्ये शंकुं निहत्य शंकुप्रमाणया रज्ज्वा मंडलं परि
लिख्य शंकोश्छायाग्रं पूर्वाह्णे यत्र मंडले लेखां स्पृशति तत्र शंकुं निहत्य निर्गमवेलायां चापराह्णे तौ पू
र्वापरौ निहितौ न्यो भवने पूर्वाह्णे शंकुच्छायाग्रे रेखायामेव लक्षणं कृत्वा शंकुलक्षणयोरंतरालं प्रतीच्यां दि
शि यच्छं पुं प्रसवसारयेन् उपक्रमदेशं प्रति ॥ यावदायामं प्रमाणं ॥ यावदायाममित्यव्ययीभावः ॥ यावद
वधारण इति ॥ किमत्रावधार्यते आयामं ॥ आयाममेव प्रमाणमिति ॥ न तिर्यङ्मानलक्षणया रज्ज्वा न
प्यामपि विहरणस्य शक्यत्वात् ॥ प्रमाणसंज्ञायाः प्रयोजनं प्रमाणं तृतीयेन वर्धयेदित्यायामसंप्रत्य
र्थं ॥ तदर्धमभ्यस्य ॥ तदिति प्रमाणं परामृश्यते ॥ तत्रस्थप्रमाणमभ्यस्यार्धं तदर्धमभ्यस्य प्रक्षिप्य प्रमाण
स्योपरि ॥ अपरस्मिन् तृतीये षड्भागोने लक्षणं करोति ॥ अभ्यासस्य हि तं प्रमाणमुभयतः पाशौ कृत्वा अ
परस्मिन् भागे तृतीये लक्षणमिरंछनं करोति ॥ आयामस्य षड्भागोने लक्षणं कुर्यात् ॥ पश्चांतयोरंतौ नि

Indira Gandhi National Centre for the Arts

शु॰ कपर्दी

२ यम्य ॥ पृष्ठ्येन वा पृष्ठ्या ॥ तस्या अंतयोः शंकू निहत्य तयोः पाशौ प्रतिमुच्य ॥ लक्षणेन दक्षिणापायम्य
निमित्तं करोति ॥ लक्षणेन दक्षिणं प्रसार्य यथा षड्भागोना तिर्यङ्मानी शेषस्य करणा रज्जुः एवमपसा
रयति निमित्तं हन्यात् ॥ एवमुत्तरतः ॥ एवमुदगपसार्य पूर्ववत् कुर्यात् ॥ विपर्यस्येतरतः ॥ पूर्वस्माच्छंकोः
पाशमुन्मुच्यापरस्मिन् शंकौ प्रतिमुंचेत् ॥ अपरस्माच्छंकोः पाशमुन्मुच्य पूर्वस्मिन् प्रतिमुंचेत् ॥ स विपर्यासः
॥ तं कृत्वा इतरतः अंसौ ते नैव प्रथमकृतेन षड्भागोनेन लक्षणेन दक्षिणमपसार्य दक्षिणमंसमुदगपसार्यो
॥ तं कृत्वा इतरतः अंसौ इति समाधिः ॥ तन्निमित्तोनि
त्तरमंसमिति ॥ स समाधिः ॥ उक्तेन मार्गविशेषेण पादिताः पार्श्वमान्यादय इति समाधिः ॥ तन्निमित्तं नि
रूपः सोऽधिकृतो वा ॥ निमित्तं कारणं प्रकृतिरिति पर्यायाः ॥ तदेव निरंछनार्थं यस्मात्तन्निमित्तः ॥ निरूप्यः
तिर्यङ्मान्या एवं ॥ किमुक्तं भवति ॥ उक्तेन मार्गेण प्रागायतास्तिर्यगायताः समाश्चतुरश्राः कृता इत्यर्थः ॥
आयामं वाभ्यस्यागंतुचतुर्थमायामस्याक्ष्णयारज्जुस्तिर्यङ्मानी शेषः ॥ प्रमाणं वाभ्यस्यायाममात्रीं रज्जु
मायामे प्राक्षिप्य गंतोश्चतुर्थमभ्यस्तश्चतुर्थभागमायामे संयोज्य तत्र लक्षणं कृत्वा सपादायामो क्ष्णया २
रज्जुः शेषः पादो न्यायोगः सा तिर्यङ्मानी ॥ यथाख्यातं विहरणं ॥ विहरणविधिरुक्तः ॥ इयान् विशेषः ॥

अंसौ पूर्वमापादितव्यौ ॥ विपर्यस्य श्रोणी ॥ सममन्यत् ॥ वा चौ युक्तिभेदेन विधानस्यैतत् प्रयोजनं आ
यामतृतीयमभ्यस्य परस्मिंश्चतुर्थषड्भागोनेन करणमित्येवमादीनामुपसंग्रहार्थं ॥ तत्र श्लोकः ॥ आ
गंतवर्येन द्विन्यायाभागानातिकरोति च ॥ अनसंयावदागंतुकृते कोन निरंछनं ॥ विकल्पविधाने नो
क्तेः सिद्धे व्याख्याने विहरणमिति किमर्थमुक्तं ॥ तुल्यांतरे चान्यः सममंडलादीनां गौरवप्रतिपादना
र्थमुक्तमेव विहरणं लघीय इति प्रतिपादयितुं ॥ दीर्घस्याक्ष्णयारज्जुः पार्श्वमानी तिर्यङ्मानी च यस्त
थ मत्ते कुरुतस्तदुभयं करोति ॥ दीर्घचतुरश्रस्येत्यर्थः ॥ सममंडलस्य पार्श्वमान्यादीनामभावात् वि
षमचतुरश्राश्रयणं गृह्यते ॥ पार्श्वमानी तिर्यङ्मानी कुरुत इति निर्देशादक्ष्णयारज्जुरित्येकवचननिर्देशा
द्धस्य चतुरश्रस्यैषा पार्श्वमानी एका च तिर्यङ्मानी एकैवाक्ष्णयारज्जुः संगृह्यते ॥ पार्श्वमान्या कृते चतुर
श्रे यावत् क्षेत्रं भवतीति तिर्यङ्मान्या कृते चतुरश्रे यावत् क्षेत्रं भवतीति तिर्यङ्मान्या तदुभयमक्ष्णयारज्जुः करोति
पार्श्वमानी क्षेत्रं तिर्यङ्मानी क्षेत्रं च करोतीत्यर्थः ॥ वक्ष्यति च त्रिकचतुष्कयोरित्यादी नां त्रिकावर्गो नव ॥ च
तुष्कस्य वर्गः षोडश षोडश सु नवक्षिप्ते पंचविंशतिः पंचिकावर्गः पंचविंशतिः ॥ एवं सर्वत्र द्रष्टव्यं ॥ प

Indira Gandhi National Centre for the Arts

 

थग्रहणं संसर्गो माभूदित्येवमर्थं भूतग्रहणं किमर्थं यत् पृथक् कुरुतद्दूस्यमाने संसर्गविरोधोपि स्यात्
॥३॥ थग्रहणं संसर्गो माभूदित्येवमर्थं भूतग्रहणं किमर्थं यत्पृथक्करुतद्द्दृश्यमाने संसर्गविरोधोपि स्यात्
भूतग्रहणे सत्येषदोषोपि न भवति। ताभिर्ज्ञेयाभिरुक्तं विहरणं॥ ताभिः उक्ताभिस्तिस्रभी रज्जुभिः
उक्तं विहरणं त्रेयाभिर्लौकिकाव्याभिर्मनसा परिकल्पिताभिः उक्तेन मार्गेण विहरेदित्यर्थः। प्रउगा
दिषु करणीपरिज्ञानार्थमेतत्सूत्रमिहाप्युपकरिष्यतीत्यतोक्तं। चतुरश्रस्याक्ष्णया रज्जुर्द्विस्तावतीं
तीं भूमिं करोति समस्य। द्विकरसमचतुरश्रस्याक्ष्णमा रज्जुः समचतुरश्रक्षेत्रं यावद्भवति त
स्य द्विगुणां करोति समग्रहणमर्थः। प्रउगादिषु करणीपरिज्ञानार्थमेतत्सूत्रार्धं दीर्घनिरस्य
र्थमिति चेत् न। उक्तार्थत्वात् अक्ष्णया रज्ज्वोरभावान्मंडलस्याप्रसंगः सर्वात्मना समस्यप्रति
तदप्यप्रयोजकं अक्ष्णया रज्जुरित्येकवचननिर्देशात्। प्रमाणं तृतीयेन वर्धयेत्। वर्धयेत्
प्रमाणे तृतीयं प्रक्षिपेत्। तच्च चतुर्थेनात्मचतुस्त्रिंशोनेन। सविशेषः तदिति प्रक्षिप्त तृती
यं परामृश्यते। तत्तृतीयं स्वचतुर्थेन वर्धयेदिति शेषः। आत्मचतुस्त्रिंशोनेन। चतुर्थस्य विशे
षणं। तच्चतुर्थं चतुस्त्रिंशद्धा विभज्य एकं भागमुत्सृज्य त्रिंशेनेत्यर्थः। सविशेष इति संज्ञा एवं ॥३॥

संकलितस्य सह विशेषणवर्तनइत्यन्वर्थसंज्ञा॥ द्वादशे च त्वारि चतुर्थे कृत देकं चतुस्त्रिंशद्धा विभज्य
एकं भागमुत्सृजेत्॥ एवं कृते स्रोनसप्तदशांगुलं भवति॥ द्वादशांगुलस्य तिलवर्गः॥ एवं नियुतं पड्
युतानि षट् सहस्राणि चत्वारि शतानि पष्टिश्च त्वारितिलप्रमाणानि॥ सप्तदशांगुलस्य तिलोनस्य तिला
नां वर्गः॥ त्रिअयुतानि द्वे सहस्रे नवशतानि विंशतिर्नव च॥ अत्रैवं तिलचतुरश्रमतिरिक्तं तेन सविशे
ष इति संज्ञा। यदि विशेषसहितः किमनेन प्रयोजनमिति स्वल्प पादोषो न भवतीति यः सविशेषो गृह्य
माणो दशतिलप्रेचाप्य तिरिक्तानि तेन नीवार स्थूकार्धमात्रमप्यतिरिक्तं न भवति तस्माद्दोष इति व्यव
हारार्थमेव भविष्यतीति प्रागणाप्य संज्ञा कृतार्थेरण॥ अथापरं॥ विहारं वक्ष्याम इति शेषः॥ प्रमाणं
मात्री २ रज्जुमुभयतः पाशं करोति॥ यत्प्रमाणं चतुरश्रं कर्तुमिच्छति तावत्प्रमाणां रज्जुमुभयतः पाशो
कृत्वा॥ मध्ये लक्षणमर्धमध्ये योश्चाप च्छाया २ रज्जुमायम्य पाशयोः संदाणे क्षितिशंकू निहत्य पाशयोः पा
शौ प्रतिमुच्य मध्यमेन लक्षणेन दक्षिणा पायम्य निमित्तं करोति मध्यमे पाशौ प्रतिमुच्यापर्युपरि निमि
त्तं मध्यमेन लक्षणेन दक्षिणायायम्य शंकुं निहंति तस्मिन्पाशं प्रतिमुच्य पूर्वस्मिन्नितरं मध्यमेन लक्षणेन

Indira Gandhi National
Centre for the Arts

॥४॥ दक्षिणमंसमायच्छेदुन्मुच्य पूर्वस्मादपरस्मिन् प्रतिमुच्य मध्यमे नैव लक्षणेन दक्षिणां श्रोणिमायच्छे
देवमुत्तरौ श्रोण्यंसौ॥१॥ मध्ये लक्षणमर्धमध्ययोरन्त्यपाशलक्षणयोर्मध्य इत्यर्थः॥ पाशयोर्लक्षणे
पुनः शंकू निहत्य उपांत्ययोः द्वितीयचतुर्थयोः पाशौ प्रतिमुच्य मध्यमे नलक्षणेन दक्षिणापायम्यनिमित्ते
-- सार्य निमित्तं काकपदं कृत्वा मध्यमे पाशौ प्रतिमुच्य उपर्युपरिकाकपदं तेनैव लक्षणेन दक्षिणापसार्य
शंकु निहत्य तस्मिन्नेवान्तरं पाशं प्रतिमुच्य पूर्वस्मिन् छंकावितरं पाशं तेनैव लक्षणेन दक्षिणं ... समा
यच्छेत् तत्र शंकुं निहन्यात् स दक्षिणांसः पूर्वस्मात् पाशमुन्मुच्य परस्मिन् प्रतिमुच्य तेनैव लक्षणेन दक्षि
णां श्रोणिमायच्छेत् तत्र शंकुं निहन्यात् सा दक्षिणा श्रोणिः॥ एवमुत्तरतः पक्षः इत्यादि विशेषः॥ श्रोणी
पूर्वपश्चादंसः॥ अथापरो योगः॥ विहरणविशेषः॥ पष्ठांतयोर्मध्ये च शंकुं निहत्य अर्द्धेन द्विशेषमध्य
स्य लक्षणं कृत्वा अर्धमागमयेदंतयोः पाशौ कृत्वा मध्यमे सविशेषं प्रतिमुच्य पूर्वस्मिन्नितरं लक्षणेन द
क्षिणमंसमायच्छेदुन्मुच्य पूर्वस्मादपरस्मिन् प्रतिमुच्य लक्षणेनैव दक्षिणां श्रोणिमायच्छेदेवमुत्तरौ
श्रोण्यंसौ॥ चतुरश्रप्रमाणांतयोः शंकु निहत्य तयोर्मध्ये च तृतीयं शंकुं निहत्य अर्धप्रमाणांतेन द्विशेषं॥७॥

तस्यार्धस्य विशेषं प्रमाणं तृतीयेन च षष्ठे पेदित्यादिन्यायेन लक्षणं कृत्वा पुनरर्धमागमयेत्॥ प्रक्षिपेत्॥
अंतयोः पाशौ कृत्वा मध्यमे शंकौ सविशेषं पाशं प्रतिमुच्य लक्षणेन दक्षिणा प्रसार्य शंकुं निहन्यात्॥
स दक्षिणांसः॥ पूर्वस्माच्छंकोः पाशमपरस्मिन् शंकौ प्रतिमुच्य तेनैव लक्षणेन दक्षिणा श्रोणिमाय
च्छेत् तत्रैवोदगपसार्य उत्तरा श्रोणी विपर्यस्योत्तरमंसं॥ योगद्वयमिदं समचतुरश्रसंपादकं॥ प्र
माणं तिर्यक् द्विकरण्यायामस्तस्याक्ष्णया रज्जुस्त्रिकरणी॥ प्रमाणं प्रक्रमादि तिर्यक् मानी द्विक
रणी पार्श्वमानी तस्यैव प्रक्रमादेः तस्यैवं भूतस्य दीर्घचतुरश्रस्याक्ष्णया रज्जुस्त्रिकरणी त्रिगु
णां भूमिं करोति तस्य तिर्यङ्मानीभूतस्य प्रमाणस्य कथं प्रमाणमेकं करोति पार्श्वमानी द्विकर
णी सा द्वौ करोति तदुभयमक्ष्णया रज्जुः करोति। तदुक्तं दीर्घस्याक्ष्णया रज्जुरिति। तृतीयकर
णी सा द्वौ करोति तदुभयमक्ष्णया रज्जुः करोति... तृतीयकरणी व्याख्याता अनयैव त्रि
ण्येतेन व्याख्याता विभागस्तु नवधा। एतेनैव मार्गेण तृतीयकरणी व्याख्याता अनयैव त्रि
करण्या तृतीयकरण्यप्यवगंतुं शक्येत्यर्थः॥ कथमित्याह। त्रिकरणी क्षेत्रं नवधा विभज्यैकं
भागं गृह्णीयात् प्रामाण्यं तृतीयं भवति त्रिकरण्यास्तृतीयं करोति। तत्र श्लोकः। या रज्जुस्त्रिकृ

॥५॥ न प्रोक्ता प्रमाणासविशेषयोः॥ अस्या एव तृतीयं तु तृतीयकरणीं विदुः॥ तुल्ययोश्चतुरश्रयोरुक्तः
समासः समासप्रक्रीकरणं चतुरश्रस्याक्ष्णयारज्जुरियं नेन सूत्रेण॥ नानाप्रमाणयोश्चतुरश्रयोः
समासः॥ उच्यत इति शेषः॥ ह्रसीयसः करण्या वर्षीयसो वृध्रमुल्लिखेत्॥ ह्रसीयसः अल्पीयसः
करण्या प्रमाणेन वर्षीयस इत्यर्थः॥ वृध्रं दीर्घमुल्लिखेत्॥ यचाल्पीयसः करणी तिर्यङ्मानी वर्षीयसः
करणी पार्श्वमानी तथा दीर्घचतुरश्रमुल्लिखेत्॥ वृध्रस्याक्ष्णयारज्जुरुभे समस्यतीति तदुक्तं॥ दीर्घ
स्याक्ष्णयारज्जुरिति॥ चतुरश्राच्चतुरश्रं निर्जिहीर्षन्यावन्निर्जिहीर्षेत्तस्य करण्या वृध्रमुल्लिखेत्॥ प्र
वस्मिन्निर्जिहीर्षन् चतुरश्रप्रमाणेन वृध्रं दीर्घमुल्लिखेत्॥ वृधस्य पार्श्वमानीमक्ष्णयेतरत्पार्श्वमुप
संहरेत्॥ संयोजयेत्॥ सा यत्र निपतेत्तदपछिंद्यात्॥ सा पार्श्वमानी इतरस्मिन्पार्श्वे यत्र निपत
तिस्पर्शेन तत्रापछिंद्यात्॥ छिन्नया निरस्तं॥ छिन्नया चतुरश्रे कृते तन्निरस्तं भवति॥ तथा स्वयमेव दर्श
यति॥ उपसंहृताक्ष्णयारज्जुः सा चतुःकरणी॥ उपसंहृता पूर्वं पार्श्वमानी इदानीमक्ष्णयारज्जुश्च
तुरश्रस्य सा चतुःकरणी छिन्ना चेतरा च यस्य तामभ्यन्ते कुरुतस्तदुभयं करोति॥ द्विपुरुषा छिन्ना पार्श्वमा ॥५॥

नी इतरत्तिर्यङ्मानी च यत्तत्प्रथमभूते कुरुतस्तदुभयं द्विपुरुषाक्ष्णयारज्जुश्चतुरश्रस्य सा चतुःकरणी॥
छिन्ना चेतरा च यस्य प्रथमभूते कुरुतस्तदुभयं करोति॥ द्विपुरुषा छिन्ना पार्श्वमानी इतरत्तिर्यङ्मानी च यत्
प्रथमभूते कुरुतस्तदुभयं द्विपुरुषाक्ष्णयारज्जुः करोति॥ कथमित्याह॥ तिर्यङ्मानी पुरुषः शेषस्त्रीः स्व
दुक्तं॥ तिर्यङ्मानी पुरुषं करोति॥ शेषस्तदक्ष्णयारज्जु— तदुभयं तस्याक्ष्णयारज्जुरिति त्रीन्करोति॥
तदुक्तं॥ न चाप्युक्तं॥ दीर्घचतुरश्रं समचतुरश्रं चिकीर्षन्तिर्यङ्मान्यापछिद्य शेषं विभज्योभयत उप
दध्यात्॥२॥ दीर्घचतुरश्रं समचतुरश्रं कर्तुमिच्छेत्तिर्यङ्मान्या तिर्यङ्मानीप्रमाणेनापछिद्य शेषं
विभज्य द्विधा कृत्वा न मभयतः अभ्यतः पार्श्वतश्चोपदध्यानुप्क्षिपेत्॥ खंडमागंतुना संपूरयेत्॥ खं
डमागंतुना नानाभ्यामागंतुनातिरिक्तो नपूरयेत्॥ पूरयित्वा तदतिरिक्तं संजेत्॥ तस्य निर्हास उक्तः॥
तस्यस्यागविधिरुक्तः॥ समचतुरश्रं दीर्घचतुरश्रं चिकीर्षन्॥ समचतुरश्रं दीर्घचतुरश्रं कर्तुमिच्छेत्॥
यावच्चिकीर्षेत्तावतीं पार्श्वमानीं कृत्वा यदधिकं स्यात्तद्यथायोगमुपदध्यात्॥ यावता दीर्घमभूत्तेन प्र
योजनं तावत्पार्श्वमानीमारिरब्यं यदधिकं स्यात्तद्यथायोगं यथान्यत्र योग्यं तेन तत्र प्रक्षिपेत्॥ चतुरश्र



Indira Gandhi National Centre for the Arts

॥ ६ ॥ विभज्य उभयतः प्रउगे विनियोगः ॥ अवकीर्णिपशौ च ॥ चतुरश्रं मंडलं चिकीर्षन् ॥ चतुरश्रं मंडलं कर्त्तु
मिच्छेत् रथचक्रादौ विनियोगः ॥ मध्यात्कोट्यां निपातयेत् ॥ मध्यप्रदेशं कोपाशं प्रतिमुच्य तत्कोट्यामायच्छेत्
कोणेनायच्छेत् अपसार्य तत्र लक्षणं कृत्वा ॥ पार्श्वतः परिकृष्यातिशयतृतीयेन सह मंडलं परिलिखेत् ॥
तेनैव लक्षणेन पार्श्वे आकर्षेत् ॥ परिकृष्टा यावच्चतुरश्रमनीयश्रेते सोतिशयः ॥ तेनातिशयस्य तृतीयेन
सह चतुरश्रार्धेन मंडलं परिलिखेत् ॥ सर्वतो विलिखेत् ॥ सानित्या मंडलं ॥ सा अनित्या मंडलं करोति ॥ अ
नित्याः स्थूलापरस्परविरोधात् ॥ यावद्दीयते तावदागंतु ॥ यावत्स्त्रिक्षिप्यहीयते तावत्सार्धेन निर्गच्छति ॥ ए
तच्च वचनमासन्नकरत्वस्थापनार्थं ॥ मंडलं चतुरश्रं चिकीर्षन् विष्कंभं पंचदश भागान्कृत्वा द्वावुद्धरे त्रयोद
शावशिष्यंते सानित्या चतुरश्रं ॥ मंडलं चतुरश्रं कर्त्तुमिच्छन् मंडलस्य विष्कंभव्यासं पंचदशधा विभज्य द्वौ
भागौ त्यजेत् ॥ त्रयोदशभागाः शिष्यंते तैस्त्रयोदशभिर्भिर्यावता रज्जुस्तावत् क्षेत्रं चतुरश्रं करोति सा चानित्या स्थू
लतरा ॥ त्रयोदशावशिष्यंत इति वचनं सुखांतरोक्तादपिना सत्वरमिति स्थापनार्थं तीव्रसुसोमे विनि
योगः ॥ तत्र प्राच्यैकादशिनीमानयात् त्र्यर्धांगुलेन प्रादेशमात्रं वेदिखंडमुपादातव्यं ॥ यदि द्वादशांगुला उ
परा ॥ अर्धप्रादेशांगुलहीनाः षट्त्रिंशत्प्रक्रमा प्राचीवेदीविमायपादटीयाछेकोदक्षिणतः षडंगुले शंकुं निहस्य ॥ ६ ॥

ताषष्ठ्या साचतुर्विंशतिप्रक्रमा प्राची वेदिर्मातव्या ॥ दशानां क्षेत्रं सूत्रकारोपदेशेन पंचविंशशतानि चत्वा
रिंशदधिकान्यंगुलिक्षेत्राणि तथा द्व्यर्धांगुलिंग ह्यतेवेदिविष्कदार्धमते --- षुपूर्वार्धानां वेदिसंस्कारान्
क्रियंते अतिरिक्तं क्षेत्रं निरस्तं भवति ॥ वेदश्चावयवेषु विच्छित्तिर्भवति ॥ प्रमाणेन प्रमाणं विधीयते चतुरश्रं ॥
प्रमीयते क्षेत्रमन्योति प्रमाणं प्रक्रमादिः ॥ यत्र प्रमाणे नैव चोदनानत्रते नैव चतुरश्रं विधीयते प्रत्येतव्यं पुरु
षं दक्षिणे पक्ष इत्यादिषु च संस्थाविविच्छिन्ना ॥ आदेशादन्यत् ॥ आदिशतीत्यादेशो विधिः ॥ विधेरन्यद्भवति
यत्र विधीयते नेतत्रान्यदपि भवति ॥ तेनैव प्रकारेण गार्हपत्यचितिषु परादि ॥ द्वाभ्यां चत्वारि ॥ द्वाभ्यां प्रक्रमाभ्यां
चतुरश्रे कृते चत्वारि पुरुषप्रमाणानि भवंति ॥ मंडलानां चतुरश्रकरणमुक्तं ॥ इदं नोक्तं ॥ इयत्या रज्ज्वा इयत्
क्षेत्रं भवतीति अत इदमुच्यते ॥ त्रिभिर्नव ॥ त्रिभिः कृते नव चतुरश्राणि भवंति तथाभ्रमावालिख्य द्रष्टव्यं ॥
यावत्प्रमाणा रज्जुस्तावतस्तावतो वर्गान्करोति ॥ यावत्प्रमाणा यावदायामा रज्जुः तावतो वर्गान् करोति ॥
पंक्तीः करोति ॥ यावत्संख्यायुक्ता प्रमाणा तावत्संख्यायुक्ताः पंक्तीः करोति ॥ पंचप्रमाणा पंचसंख्यायुक्ता
न् करोति ॥ एवं सर्वत्र योजनीयं ॥ तथोपलब्धिः ॥ भूमावालिख्य प्रेक्षिते तथैवोपलभ्यते ॥ द्वाभ्यां कृते उभय

Indira Gandhi National
Centre for the Arts

॥७॥ तउभयतो लिखिते चत्वारि श्रंगाणि भवंति॥ पंक्तिभिः कृते पंच षोभयतो लिखिते पंचविंशति श्रंगाणि भवं
तउभयतो लिखिते चत्वारि श्रंगाणि भवंति ... ॥ अध्यर्धपुरुषार्त्नु द्वौ सपादौ करोत्य द्वित्तीयपुरुषाष्टसपादान्॥ उपर्यर्धं यस्याः
ति॥ एवं सर्वत्र द्रष्टव्यं॥ अध्यर्धपुरुषारत्नु द्वौ सपादौ करोत्य द्वित्तीयपुरुषाष्ट सपादान्॥ उपर्यर्धं यस्याः
सा अध्यर्धा तया कृते चतुरश्रे सपादौ द्वौ करोति॥ एकस्य वर्गे एकः॥ तस्याग्रतः पार्श्वतश्च द्व्यर्धौ सर्वे समस
हत्वौ॥ अर्धेषयच्चतुरश्रं कृतकोष्ठं सपादः तेन सह पादौ द्वौ करोति॥ एवमेवात्र सरत्रं योजितव्यं॥ अथाय्संत
प्रदेशः॥ सार्वत्रिको विधिः॥ यावता यावताधिकेन परिलिखति तस्यार्ध्यं योरुपदधाति॥ यावताच्छेदेनाधिके
न परिलिखति तस्यार्ध्यं योरंततः पार्श्वतश्च उपदधाति॥ यद्यनेन चतुरश्रं क्रियते तत्कोष्ठं॥ एवमुदितेषयच्च
तुरश्रं कोष्ठांते नैव सहस्रसंख्या वोद्धव्यति मंडलपूरणे चैकेनैकं भवति॥ अर्धेन चाद्गमिति कस्यांचित् भ्रांतिः स्या
त् अतस्तामपकर्तुमाह॥ अर्धप्रमाणेन पादप्रमाणं विधीयते॥ प्रमाणस्यार्धप्रमाणेन पादसमाणं विधीय
तइति॥ अस्यैवकारणमाह॥ अर्धस्य द्विप्रमाणयाः पादपूरणत्वात्॥ अर्धस्य द्विप्रमाणा पुरुषमात्री॥ तं द्वाना
यणदानपूरणं यतः॥ तदुक्तं द्वाभ्यां चत्वारीति॥ तृतीयेन नवमीकला॥ प्रमाणतृतीयेन नवमीकलानवमोंशइ
त्यर्थः॥ तदप्युक्तं त्रिभिर्नवेति॥ ॥ प्रथमः पटलः॥ ॥छ॥ ॥ आग्न्याधेयिके विहारे गार्हपत्याहवनीययोरंतराले ॥७॥

विज्ञायते॥ पूर्वं पविशेषेण मानमुक्तं॥ अस्येयानाया महयान् विस्तार एवं विहर्तव्यमिति विशेषविधानार्थमाह॥
आहवनीयगार्हपत्ययोरंतराले यथास्यात् आहवनीयदक्षिणाग्न्योः दक्षिणाग्निगार्हपत्ययोर्वा याभूदिति एव
मर्थं गार्हपत्याहवनीयग्रहणं॥ विज्ञायते श्रूयते॥ वक्ष्यमाणा॥ अष्टासु प्रक्रमेषु ब्राह्मणोग्निमादधीत॥ प्रक्रमे
ण प्रमाणं वक्ष्यति॥ अष्टौ प्रक्रामानतीत्य गार्हपत्यादाहवनीयं प्रतिष्ठापयति स्थापयति॥ एकादशसु राजन्यो द्वाद
शसु वैश्यः॥ एवमेकादशसु राजन्य वैश्यस्य द्वादशसु॥ चतुर्विंशत्याम परिमिते यावतावा चक्षुषा मन्यते तस्मा
न्नातिदूरमादधेय इति सर्वेषामविशेषेण श्रूयते॥ यावता वेति सर्वेषां विधिर्विकल्पेन इयतांतराले न सर्वे विहा
रसंपन्ना भवतीतिमतं॥ अतिदूरप्रतिषेधो व्यवाय परिहारार्थः॥ यद्यतिदूरमाधीयते तेन दास्यादयो व्यवेयुः॥ द
क्षिणतः पुरस्ताद्वित्तीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेर्विज्ञायते॥ दक्षिणतः पुरस्तात्॥ दक्षिणतः प्रो
क्षिणतः पुरस्ताद्वित्तीयदेशे गार्हपत्यस्य नेदीयसि दक्षिणाग्नेर्विज्ञायते॥ दक्षिणतः पुरस्तात्॥ दक्षिणतः प्रो
त्ते देशे वित्तीयदेशे॥ अस्य वित्तीयदेशः गार्हपत्याहवनीयोरंतरालस्य नेदीयसि आसन्न वित्तीयदेशे पार्श्वां
दिसर्थः॥ तत्र दक्षिणाग्नेरायतनं स्थानमिति श्रूयते॥ ततषं गृह्यत इत्याह॥ गार्हपत्याहवनीययोरंतरालं पं
चधा षड्धा वा संभुज्य षष्ठे सप्तमे वा भागमागंतुमुपसमस्य समंत्रे धं विभज्य॥ गार्हपत्याहवनीययोरंतराले

Indira Gandhi National
Centre for the Arts

॥८॥ पंचधा विभज्य षड्धा वा यदि पंचधा तदा षष्ठो भाग आगंतुर्यदि षड्धा तदा सप्तमो भागस्तमुपसमस्य संयोज्य
समं त्रेधा विभज्य आगंतुना सह द्वितीये मार्गे दितिसमग्रहणं॥ अपरस्मिंस्तृतीये लक्षणं कृत्वा गार्ह
पत्याहवनीययोरंतौ नियम्य॥ पाशौ प्रतिमुच्य॥ लक्षणेन दक्षिणापायम्य निमित्तं करोति॥ तत्र शंकुनि
हन्यात् यद्दक्षिणाग्नेरायतनं स्यादिति सामर्थ्यात्॥ सामर्थ्यमभिधानशक्तिः॥ अस्याः श्रुतेरयमेवार्थ इति॥
तेन त्रिषु प्रथमविस्तारयामानि त्रीणि चतुरश्राणि कृत्वा परस्मिंश्चतुरश्र उत्तरे स आहवनीय इत्येवमादयो
ग्नि-- रस्ताभवंति॥ सर्वत्राग्न्यायतनानि चतुरश्राणि परिमंडलानि वा॥ इह तु मंडलं गार्हपत्यं॥ अर्धमंड
लाकारमन्वाहार्यपचनं॥ चतुरश्रमाहवनीयमिति॥ सममंडलचतुरश्रयोरुक्तो विधिः॥ दक्षिणाग्नेः प्र
योग उच्यते॥ विशीलद्विचरण्या चतुरश्रं कृत्वा पूर्वोक्तेनैव विधानेन मंडलं कृत्वा तस्य मंडलस्य विष्कंभच
तुर्भागं दक्षिणाग्नेः पूर्वं निहिताच्छंकोरुदगपसार्य शंकुं निहत्य तस्मिन्पाशं प्रतिमुच्य विष्कंभार्धेन मंडलं परि
लिख्य उत्तरमर्धं सृजेत्॥ तत्र श्लोकौ भवतः॥ दक्षिणाग्नेर्हनाच्छंकोरुदक् शंकुं दशांगुले॥ एकादशांगुले लिहने
कार्यः सधनषासमः॥ तस्मिन्पाशं प्रतिमुच्य विंशत्यायतया लिखेत्॥ ऊनयानुद्यां विंशतिभिर्लेरर्धं सृजेद्दुगतिः॥ ॥८॥

यजमानमात्री स्यादि दर्शीक्या वेदिः श्रुतिः॥ यजमानमात्री प्राच्यपरिमिताथ यथासन्नानि हवींषि संभवेदे
वंति रश्मी प्राचीवेद्यं सा॰ संनततरे वर्भि वहियो षेति दार्शिक्या वेदेर्विज्ञायते॥ अस्याः श्रुतेरर्थविमानविधिनैव
च्याच्छे॥ अपरेणाहवनीयं यजमानमात्री दीर्घचतुरश्रां विइस्तनावंतीं रज्जुमभ्यस्य मध्ये लक्षणं कृत्वा दक्षिण
योः श्रोण्योः सयोरंतौ नियम्य लक्षणेन दक्षिणापायम्य निमित्तं करोति निमित्ते रज्जुं नियम्यांतौ समस्य दक्षि
णायै श्रोण्यै दक्षिणमंसं समालिखेदेवमुत्तरतस्तिर्यङ्मानीद्विगुणां तथा कृत्वा पश्चात्पुरस्ताच्चोपलिखेद्दि
भिन्नायां पुरस्तात्पार्श्वमान्यावुपसंहरेद्धुतिसामर्थ्यात्॥ अपरेणाहवनीयमेकरज्ज्वादिभिर्दीर्घं चतुरश्रं वि
हस्य संपाद्य यजमानमात्रं पार्श्वमानी च यथासन्नानि हवींषि संभवेत् परस्परमसंघटितानि तिष्ठंति तथाति
र्यङ्मानीतस्यास्त्रिभागो नं वाति रश्मी वोपायनीये मुख्ये प्रतिपादितं तावतीं रज्जुमभ्यस्योभयतः पाशौ कृत्वाम
ध्ये लक्षणं च कृत्वा दक्षिणयोः श्रोण्योः सयोरंतौ नियम्य पाशौ प्रतिमुच्य लक्षणेन दक्षिणापसार्य निमित्ते शं
कुं निहत्य तस्मिन् शंकौ रज्जुं संयोज्यांतौ समस्य पाशावुन्मुच्य एकेन हस्तेन गृहीत्वा दक्षिणां श्रोणीमपरभ्य
यावद्दक्षिणं समालिखेत् एवमुत्तरपार्श्वमालिखेत्॥ एतत्संत्रनरं वेदेः॥ तिर्यङ्मान्यामप्येवं कुर्यात्॥ तिर्य

Indira Gandhi National
Centre for the Arts

॥९॥ श्रानीप्रमाणां रज्जुमभ्यस्य मध्ये लक्षणं कृत्वा श्रोण्योरंतौ पाशौ प्रमुच्य लक्षणेन पश्चादपसार्य तत्र शंकुं निह
त्य तत्र रज्जुं प्रतिबध्य तत्र समस्य दक्षिणां श्रोणिमारभ्य यावदुत्तरश्रोणिस्तावदालिखेत् ॥ एवं पुरस्तादपि
करोति ॥ एतदुत्पन्नं श्रोण्यंसं ॥ एवं प्रकारा हि योषा ॥ हि शब्दो रूपप्रसिद्धौ ॥ प्राक्शिरास्त्री एवमेवेसर्पः ॥
विभिनाया मेवं चतुरश्रमापादिनायां पुरस्तात्सार्धमात्यादुपसंहरेत् संकोचयेत् श्रुतिसामर्थ्यात् ॥ पुरस्ता
द्वंहीयसीमिति सैषा श्रुतिः तस्याः सामर्थ्यात् ॥ इतरथा यो यासादृश्यमपि न स्यात् ॥ त्रिंशत्पदानि प्रक्र
मा वा ॥ ४ ॥ पश्चात्तिरश्ची भवति षट्त्रिंशत्प्राची चतुर्विंशतिः पुरस्तात्तिरश्चीति सौमिक्यां वेदेर्विज्ञा
यते ॥ पदानीयस्मदीया श्रुतिः ॥ त्रिंशत्पदानि प्रक्रमा वा पश्चात्तिर्यङ्मानी भवति ॥ षट्त्रिंशत्प्राप्रा
चीचतुर्विंशतिः पुरस्तात्तिर्यङ्मानी भवतीति सौमिक्या वेदेः सोमे श्रुतिः ॥ षट्त्रिंशिकायामष्टादशोपसम
स्यापरस्मादंताद्द्वादशसु लक्षणं पंचदशसु लक्षणं षष्ठां तयोरंतौ नियम्य पंचदशिकेन दक्षिणापाय
म्य शंकुं निहंस्येवमुत्तरतस्ते श्रोणी विपर्यस्तया ॥ सोपंचदशिकेनैवापायम्य द्वादशिके शंकुं निहंसेवमु
त्तरतस्तावंसौ तदेकरज्वा विहरणं ॥ षट्त्रिंशिकायां रज्वामष्टादशोपसमस्य प्रक्षिप्यांतयोः पाशौ ॥९॥

कृत्वा परस्मादंताद्द्वादशसु लक्षणं पंचदशसु लक्षणं निरंछनं लक्षणापष्ठां तयोः प्राग्वंशसमध्यमा ॥
त्वालोटिकात्यात् ॥ अथ प्राच्यः प्रक्रमान् आक्रम्य शंकुं निहत्य तस्माच्च पुरस्तात् षट्त्रिंशत्प्रक्रमे शंकुं निहत्य
तयोः पाशौ प्रतिमुच्य पंचदशिकेन दक्षिणापायम्य शंकुं निहन्यात् ॥ सा दक्षिणा श्रोणिः ॥ एवमुत्तरतोपसा
र्य शंकुं निहन्यात् ॥ सोत्तरा श्रोणिः ॥ विपर्यस्तयांसौ ॥ शंकोः पाशावुन्मुच्य पूर्वं पाशमपरस्मिन् प्रतिमुंचेत् ॥
अपरं पूर्वस्मिन् प्रतिमुंचेत् ॥ स विपर्यासः ॥ सा विपर्यस्तया एवं कृतया रज्वा सोमातव्यौ ॥ तेनैव निरंछनेन दक्षि
णापर्यद्द्वादशिके शंकुं निहन्यात् तेनैवोदगपसार्य द्वादशिके शंकुः ता वंसौ महावेद्यामानं विमर्शमिदमुच्यते ॥ या
वतार्हिदुमेतत ॥ अनेकरज्जुविहरणमसमचतुरश्रस्य नान्यो ॥ त्रिकचतुष्कयोः कुविबक्षणो चाभितिव निस
रिहरंति ॥ आयामं वयोस्मन्यस्तेपि द्वादशिके लक्षणं पंचदशिके लक्षणं च सर्वविंशतेर्नरंछनमिति लक्षलल
वाहुल्यप्रतिपादनार्थमित्यपरे ॥ समचतुरश्राणां दीर्घचतुरश्राणां च विहरणमुक्तं इह तु दीर्घविषमचतुर
श्रस्येसन्ये ॥ त्रिकचतुष्कयोः पंचिका क्षणयारज्जुः ॥ यस्य चतुरश्रस्य त्रिकास्तिर्यङ्मानी तस्या क्षणयारज्जुः पंचि
का ॥ त्रिभिस्त्रिरभ्यस्ताभिरेवं सैव ॥ ताभिरं सोमातव्या ॥ त्रिकं त्रिरभ्यासयुक्तं द्वादशभवंति ॥ चतुष्कं षोडशपं

Indira Gandhi National
Centre for the Arts

॥१०॥ चिकाविः शान्तिः ॥ यूपावटीयाच्छंकोः पश्चात्षोडशसु शंकुं निहत्य तस्मिन्नष्टाचिकां स्पाश्यांसां प्रतिमुच्य यूपावटीये
स्पाश्यां त्रिंशिके प्रतिमुच्यांसायायच्छेत् ॥ चतुरभ्यस्ताभिः श्रोणी ॥ ताभिरेव चतुरभ्यासयुक्ताभिः श्रोणी मात
व्यौ ॥ द्वादशिकपंचविंकयोस्त्रयोदशिकाकृष्णयारज्जुस्ताभिरंसौ ॥ षोडशसु शंकुं निहत्य तस्मिन्नष्टाचिकां स्पा
श्यासपंचविंशतिं प्रतिमुच्य ताभिरंसौ मातव्यौ ॥ द्विरभ्यस्ताभिः श्रोणी ॥ यूपावटीयेत्रयोदशिकां स्पाश्या
सं प्रतिमुच्य स्पाश्यासां द्वादशिकां च प्रथमनिहतपंचिकां स्पाश्यासां ताभिः श्रोणी मातव्यौ ॥ पंचदशिकाष्टिक
योः सप्तदशिकाकृष्णयारज्जुस्ताभिः श्रोणी ॥ प्रथमनिहिताच्छंकोरष्टसु शंकुं निहत्य तस्मिन्सप्तदशि
कामष्टिकां च प्रतिमुच्य प्रथमनिहितपंचदशिकां ताभिः श्रोणी ॥ द्वादशिकपंचत्रिंशिकयोः सप्तत्रिंशि
कास्पा पारज्जुस्ताभिरंसौ प्रथमनिहिताच्छंकोः पुरस्तात्प्रक्रमे शंकुं निहत्य तस्मिन्सप्तत्रिंशिकां पंच
त्रिंशिकां च प्रतिमुच्य यूपावटीये द्वादशिकां ताभिरंसौ मातव्यौ ॥ एतावंति ज्ञेयानि वेदिविहरणानि भवंति
॥ एतावंत्येव स्पुटमूलानि ज्ञातुं शक्यानि वेदिविहरणानि भवंति ॥ अन्ये तु स्पुटमूलाः कल्पयितुमशक्याः
॥ तस्मादेतावतीस्व धार्यंते ॥ अष्टाविंशत्योनं पदसहस्रं महावेदिः ॥ नवशतानि द्विसप्ततिश्च पदप्र ॥१०॥

माणानि प्रक्रमप्रमाणानि या चतुरश्राणि महावेदेः ॥ महद्ग्रहणं किमर्थं ॥ पदप्रमितायां महावेद्यां सदो
हविर्धानादीनामपि पदेनैव मानार्थं प्रक्रममितायामरत्निप्रक्रमैरेव ॥ नवारत्नि तिर्यगित्यरत्निमानं
सदसो विहितं ॥ नवा॰ यंगति ॥ नियतप्रमाणविधानादनुमीयते ॥ तथा हविर्धानस्य अरत्निविस्तारं ॥
नवायाममित्यनुमीयते तत्कथं पदेन तयोर्मानं लभ्यते इति ॥ उच्यते ॥ चत्वारिंशदधिकानि पंचशतान्यंगु
लप्रमा ऽणु॰ पदविहिताया वेदेरायामः ॥ पदं पंचदशांगुलमिति वचनात् ॥ सदसः पश्चात्संच चत्वारिं
शदंगुलं सदसः षोडशाधिकं शतद्वयं सदोहविर्धानयोर्मध्यं पंचचत्वारिंशत्संचरं हविर्धानस्य षोडशाधि
कं शतद्वयं अवशिष्टादशांगुलं तस्मादुत्तरवेदिसदोहविर्धानानामेतवे ग्रसंभवात् बहिः कल्पनीयाः
अरत्नेर्षाकासः कल्पनीयः ॥ तदुभयमचोदितं भवति ॥ ततो ये न चोदिर्मीताने नैव तेषां मानार्थं महद्ग्रहण
मिति सिद्धं ॥ दक्षिणस्मादंसाद्द्वादशसु दक्षिणस्यां श्रोण्यां निपातयेच्छेदं विपर्यस्येत् उत्तरत उपदध्यात् सा दीर्घं च
तुरश्रान प्यायुक्ता॰ संचरीत ॥ दक्षिणस्मादंसादारभ्य द्वादशस्वेव श्रोण्यां निपातयेत ॥ त्रीणि पदानि श्रो
णीदेशे शिष्टानि ॥ विपर्यस्योत्तरस्मिन्नंसे मनसा स्थापयेत् ॥ एवं कृते सप्तविंशतिविस्ताराद्द्वित्रिंशदायता

Indira Gandhi National
Centre for the Arts

॥११॥ दीर्घचतुरस्रा भवतितु यथाभूतां गणयेत्॥ सौमिक्या वेदिस्तृतीययज्ञ इति सौत्रामण्या विज्ञायते॥ वेदिस्तृतीये
यजेतेति श्रुतेः॥ दार्शिकपाशुकयोरसंभवात् सौमिकीत्युच्यते॥ अतः सौमिक्या इत्युक्तं॥ 
प्रक्रमस्य तृतीयकरणी प्रक्रमस्थानीया भवति॥ तृतीयकरणी प्रक्रमस्थाने॰ स्थानीतादिभाषेति
वप्रत्ययः॥ तृतीयकरणं प्रक्रमं कृत्वा षट्त्रिंशिकायामित्यादिना विहरेत्॥ त्रिकरण्या वा॥ वक्ष्यमा
णेन विधिना त्रिकर-- अष्टिकदशिके तिर्यङ्मान्यौ॥ अष्टिका पुरस्तात्तिर्यङ्मानी॥ द्वादशिका
पश्चात्॥ द्वादशिका--यमा- द्वादशसु षट्सु पसमस्यापरस्मादंतात्संच सुलक्षणं चतुर्षु लक्षणं कृत्वा
पक्षांतयोरंतौ नियम्य पंचदशिकेन दक्षिणापसार्य शंकुं निहन्यात्॥ एवमुत्तरांतस्त्रश्रोणी॥ विप
र्यस्त यांसौ॥ पंचदशिकेन दक्षिणापसार्य चतुर्षशंकुं निहन्यात् एवमुत्तरतस्मात् सौ भवतः॥ त्री
णि चतुर्विंशानि पदशतानि सौत्रामणिकी वेदिः॥ दक्षिणस्मादंसादारभ्य चतुर्षे वदक्षिणस्यां श्रोण्यां
निपात्य छेदं विपर्यस्येत्यादि पूर्ववत् प्रेषितेनैव विस्तार द्वादशायामं भवति एवसंच स्पीत॥ छिन्ना वा वेदि
र्भवतीत्याम्नाये विज्ञायते॥ कस्यचिद्धि स्यात्॥ सौमिक्याः प्रकृतत्वात्प्रकृति वाच॥ प्रक्रमस्य द्विकर ॥११॥

णी प्रक्रमस्थानीया भवति॥ द्विकरण्या प्रमाणं तृतीये नवर्धयेदित्यादिना वर्धितेन तदेव विहरणं॥
प्रक्रमो द्विपदस्त्रिपदो वा॥ द्विपदस्त्रिंशदंगुलं त्रिपदः पंचचत्वारिंशदंगुलं पंचदशांगुलमिति वच
नात्॥ प्रक्रमे याथाकामी शब्दार्थस्याविशेषितत्वात्॥ कामइच्छा यथाकाममेव याथाकामीय येच्छा तथा
॥ हीयात्॥ प्रक्रमः अध्वर्यु प्रक्रमो विप्रकृष्टक्रम इति नैव मन्त्वर्थसंज्ञापदादपि कस्यमानार्थस्यवा
चकः स द्यायौगिकः तदा द्विपदं त्रिपदं वा नातिक्रमं सनेनेति प्रक्रमः प्रकृष्टः क्रमः प्रक्रम इति यदानि
रूढ॰ कल्पनार्थद्रव्यवचनात् पदादधिकं प्रक्रममिति शब्दार्थस्य विशेषितत्वात्॰ विशेषितत्वं कल्पना
यामपि वाचकत्वाद्नेन वाचकसंशब्दानां विशयसंयमः॥ कस्य पदादयोगहीतव्याद्याह॥ यज
मानस्य पदं ग्राह्यं॥ स्वामित्वात्॥ अध्वर्योर्वा॥ वाशब्दः पक्षव्यावृत्तौ॥ न यजमानस्य॥ अध्वर्योरेव॥ कु
तः॥ एषहि चेष्टानां कर्ता भवति॥ चेष्टन इति चेष्टाः कर्माणि॥ कर्मणां कर्तायतः॥ हिरावेहितौ॥ त
स्मादध्वर्योरेव न यजमानस्य॥ रथमात्री निरूढपशुबंधस्य वेदिर्भवतीति विज्ञायते॥ रथप्रमाणा निरू
ढपशुबंधस्य वेदिरिति श्रुतिः॥ तत्ररथस्याहु॥ रथस्य शद्वोलंकारः॥ तत्र तस्मिन्नर्थे रथप्रमाणविदा

Indira Gandhi National Centre for the Arts

॥१२॥ रथकारा आहुः॥ रथाक्षमात्री॥ पश्चात्तिर्यगीषया प्राचीविषययुगेन पुरस्तात्॥ रथाक्षमात्री पश्चा
त्तिर्यग्मानी॥ रथग्रहणं शकटनिवृत्त्यर्थं॥ इषामात्री पृष्ठ्या॥ विषययुगेन व्याप्तः पंथा येन युगेन तद्वि
षययुगं॥ अभ्यंतरयुगछिद्रयोरथांतरालं तत्प्रमाणा पुरस्तात्तिर्यग्मानी॥ यावता बाह्यो छिद्रे॥ याव
ता वा प्रमाणेन युगस्य बाह्यछिद्रं भवतः॥ तद्वा पुरस्तात्तिर्यग्मानी वेदः॥ तदेव रज्ज्वोक्तं॥ तदेव रज्जुरि
ति किं सौमिकी गृह्यते आहोस्वित्प्रथमा॥ सौमिकी गृह्यते॥ पंचदशिके नेति दर्शनात्॥ तत्राहि पंचदशीवे
नेति दर्शनात् तत्रापि पंचदशिकेन लक्षणेनेतरत्रेषामात्री॥ इषां षट्त्रिंशद्धा विभज्य एकं भागं प्रक्रम
स्थानीयं कृत्वा सौमिकवत् पंचदशिकेनापायम्य॥ अंसश्रोणी मिउ यादध्युगेनांसौ पिनु यादिति वे
चित्॥ अपरे पुनः प्रथमामेव रज्जुं गृह्णंति॥ यदि सौमिकी गृह्यते एते अदृष्टकल्पना प्राप्नोतिव पंच
दशिकेनेति चेत्॥ बहुलक्षणायां बहु त्रिंशिकायां पंचदशकं ततः षड्भागो नमेव तस्मात् पंचदश
के नेति षड्भागं भक्षयितुं न शक्यते तादशकल्पना भवति॥ नक्षत्र लक्षणा॥ सानुलोमिकी किंच साधार
णत्वाच्च सैवैका रज्जुः साधारणी तस्माच्च सैव ग्राह्या॥ एवमुत्तरत्रापि योजनीयं॥ अपोद्दे अर्धं युगेष ॥१२॥

लक्षणकृत्वा षड्भागेनापायम्यांसे श्रोणी अर्धं युगेनांसौ॥ अथाप्युदाहरंति॥ अथ शब्दः समुच्च
ये॰ एवं चोदाहरंति रथप्रमाणविदो रथकाराः॥ अष्टाशीतिशतमीषा तिर्यग्दक्ष चतुःशतं॥ षडशीतिर्यु
गं चास्य सरथस्कार एव उच्यत इति॥ एवं रथपरिमाणं॥ सर्वतोमानमुदाहरंति ब्रुवंते॥ सामर्थ्यसिद्धे
षांगुलिर्गृह्यते॥ रथेषाप्रमाणमेतद्दष्टाशीत्युत्तरमंगुलीशतं तिर्यक्शब्दः प्रकरणार्थः॥ अक्षप्रमा
णं चतुरुत्तरं शतं॥ युगेस्य प्रमाणं षडशीतिः॥ एवं लक्षणो रथः सचारलः॥ न चरत्यनेनेति चरणः॥
चारण एव चारणः॥ चारणग्रहणं त्रीडादिरथनिवृत्त्यर्थं॥ अथ वास्य शब्दस्य स्थाने पस्य शब्द मध्या
हृत्य योजनीयं॥ वर्णव्यत्ययेन॥ अरत्निभिर्वा चतुर्भिः पश्चात्षड्भिः प्राची त्रिभिः पुरस्तात् तदेव रज्ज्वोक्तं पं
चदशिकेनैवापायम्य द्वाभ्यामध्यर्धेनेति श्रोण्यं सान्निर्हरेत्॥ अरत्निभिर्वा मातव्यमिति शेषः॥ चतु
र्भिः पश्चात्तिर्यग्मानी॥ षट्प्राची पृष्ठ्या॥ त्रिभिः पुरस्तात्तिर्यग्मानी॥ तदेव रज्ज्वोक्तमित्यादि गतमेतत्॥
यजमानमात्री चतुरस्रत्रिः भवतीति ज्ञापयेत् यथा वेदिर्वितायते॥ येत्स्मा वेदिः स्मृतिः॥ यथादि ष्टास्तत्तया
भवंति तथा मातव्या॥ तदेव रज्ज्वेति गतार्थं॥ दशापदोत्तरवेदिर्भवतीति सोमे विज्ञापते॥ पदग्रहणं प्रदर्श



Indira Gandhi National Centre for the Arts

॥१२॥ नार्थप्रक्रमभितायां महावेद्यां दशपदोत्तरवेदिः॥ सर्वतो दशपदा॥ प्रमाणेन प्रमाणं विधीयत इति वचना
त्॥ एवं दशपदा गदा एकपद विस्तारा पदायामं दीर्घचतुरश्रं विहृत्य तस्याः प्रणयारज्जुं गृहीत्वा चतुरश्रं कुर्या
त्॥ प्रक्रमे प्येकप्रक्रमविस्तारं त्रिप्रक्रमायामं चतुरश्रं विहृत्य तस्याः प्रणयारज्जुं गृहीत्वा चतुरश्रं कुर्यात्॥
तदेव रज्वोक्तं पंचदशिके नेवापायम्यार्धेन ततः श्रोणि २ सामिहरेत्॥ अर्धेन ततः तस्योसर्पः॥ षष्ठ्यर्थेत
स्मिन्॥ तां युगेन यजमानस्य वा पदैर्विमाय शम्यया परिमिमीते॥ युगेनोक्तप्रमाणेन यजमानस्य वा प
दैर्यजमानग्रहणादध्वर्योर्न लभ्यते॥ यजमानग्रहणं प्रदर्शनार्थमिति केचित्॥ तस्मादेव वचनादुत्तर
वेदिर्युगमात्री लभ्यते॥ सोमे पदमात्रायां महावेद्यामुत्तरवेदिं युगेन पदैर्वा विमाय शौल्वेन मानेन प
र्यान शम्यया मानमदृष्टार्थं कर्त्तव्यं॥ शम्यया परिमिमीत इत्येतद्वचनमदृष्टार्थं न प्रमाणविधिरित्युक्तं॥
पदे युगे रत्नावियति शम्यायां च मानार्थेषु याथाकामी शब्दार्थस्य विशयितत्वात्॥ पदादिषु मानार्थेषु याथा
कामीं यच्छेद्यथाशक्तियात्॥ किमुक्तं भवति॥ अरत्निश्चतुर्विंशतिरष्टत्रिंशत्त्वांगुलिः॥ प्रयुतः
संस्पष्टइत्यपरं॥ द्वादशांगुलं प्रादेशः॥ त्रयोदशांगुलो वितस्तिः॥ दशांगुलं पदं॥ चतुर्विंशत्यंगुलयोऽरत्निः॥ ॥४३॥

षट्त्रिंशदंगुलिः शम्या॥ षडशीत्यंगुलं युगं चतुःशतमष्टाविंशत्युत्तरं शतं पुरुषः॥ इत्येवमादिष्वुक्त्वान
रात्नस्य द्वयांमानार्थेषु प्रमाणवचवाग्न्येरन्॥ उदाहरणेनोक्तं नवर्गेण विमाय तत्र याथाकामी शब्दार्थस्य
विशयितत्वात्॥ पंचदशांगुलमपि पदं भवति॥ यजमानपदोऽपि तत्रान्यतरग्राह्यं॥ इयतीत्याधानेइ महाद
शादित्रमाइति॥ तत्रस्वसंचितेपरसंचिते लोकप्रमितेनागक्रीयादित्यर्थः॥ विमितायां पुरस्तात्पार्श्वमा
न्याश्चयस्त्रं हरेच्छ्रुतिसामर्थ्यात्॥ एवं चतुरश्रमापादितायां पार्श्वमान्यौ पुरस्तादुपसंहरेत् श्रुतिसामर्थ्या
त्॥ चतुःशिखंडे युवतीकनीन इति युवतिसादृश्यानुवादः सामर्थ्यं॥ नवारत्निस्तिर्यक् सप्तविंशतिरुदगा
यतमिति सदसो विज्ञायते॥ नवारत्निः प्राचीतिर्यग्मानी सप्तविंशतिरुदीची पार्श्वमानी एवं मातव्य इति स
दसः श्रुतिः॥ पदेन प्रक्रमेण वा मानत्वेकरणमुक्तं॥ प्रथममभिहिताछेकोदक्षिणतः शंकुं निहत्य तस्मि
न्पाशं प्रतिमुच्य तस्य पुरस्तादर्धाष्टमे पष्ठ्यायां दक्षिणतः अत्र मे शंकुस्तत्र सदसो मध्यं औदुंबरी स्थाने॥
प्रथमनिहताछंकोः पष्ठ्यायामेव पुरस्तादर्धाष्टमे शंकुं निहत्य सोदुंबरीस्थानेय शंकुस्तस्मिन् रज्जुं प्रतिमु
च्योपर्युपरि शंकुमुदगपसार्यार्धचतुर्दशान वसु वा शंकुं निहन्यात्॥ पष्ठ्यायां यः शंकुस्तस्मिन् प्रतिमुच्योप



Indira Gandhi National Centre for the Arts

॥१४॥ युपयौदुंबरीस्थानाथंदक्षिणापसार्यार्धपंचदशेदृशसुवाशंकुंनिहन्यात्॥सदसदसआयामः॥तस्मि
न्नायामेनदूर्धमभ्यस्यथासूत्रेविहरेत्॥सप्तविंशतावर्धचतुर्दशमभ्यस्यदक्षिणस्मादंसादेकादश
सुसपदेषुनिरंछनमर्धपंचमेलक्षणंश्रोण्यंसार्धमष्टादशसुन – वै – प्रक्षिप्यार्धाष्टमेनिरंछनं
अर्धपचमेलक्षणंश्रोण्यांसार्धमायामयोरंतेनियम्यनिरंछनंतेनपश्चादपसार्यार्धपंचमेशंकुः॥
पुरस्तादपसार्यार्धपंचमेशंकुःतेश्रोणीसदसः॥विपर्ययस्यांसौ॥प्राग्वंशमानंहविर्धानमानमा
ग्नीध्रमानंचानेनाचार्येणनोक्तंतत्शुल्बांतरोक्तंग्राह्यमपेक्षितत्वात्॥सदसःपुरस्तात्रिषुप्रक्रमे
षुदशप्रक्रमविस्तारंदशायामंहविर्धानंमिनुयात्॥एकेरज्वापंचशंकुनाचा॥हविर्धानस्यपश्चान्मा
त्रमशंकोपाशंप्रतिमुच्योदगपसार्यद्वादशप्रक्रमेशंकुः॥नदाग्नीध्रायतनंतयारज्वादक्षिणापसा
र्यद्वादशसुमार्जालीयंपश्चायत्रसदसःपारस्यांशंकोपाशंप्रतिमुच्योदगपसार्यपादोनेद्वादशसुशं
कुंनिहत्यतस्माच्चोत्तरतःषट्सुशंकुः॥ताभ्यांचपुरस्तात्षट्सुप्रक्रमेषुशंकुंनिहन्यात्॥एवंपंचशंकु
नानात्रिशंकुनांवासमचतुरश्रंमिनुयात्॥अपप्रक्रमविस्तारंद्वादशायामंप्राग्वंशंमिनुयात्॥द्वाद ॥१४॥

शविस्तारंषोडशायामंमिसन्ये॥प्रादेशमुखाःप्रादेशांतरालाभवंतीत्युपरयाणांविज्ञायते॥उपरवा
णामपिनिगदव्याख्यातं॥यूपाम् अरत्निमात्रंचतुरश्रंविहृत्यत्रिषुशंकुत्रिहस्यार्द्धमादेशेनतंत
परिलिखेछुन्निसामर्थ्यात्॥निगदव्याख्यातं॥आयाममात्रीभवतीतिगार्हपत्यचितेर्विज्ञायते॥चतु
रत्निर्व्यायामः॥तत्प्रमाणंगार्हपत्यचितेः॥चतुरश्रेत्येकेषां॥चतुरश्रागार्हपत्यचितिरित्येकेषांशा–
खिनांमतं॥परिमंडलेत्येकेषां॥परिमंडलागार्हपत्यचितिरित्येकेषांश्रुतिःकरणंव्यायामस्तृतीयाया
म॰ सप्तमंव्यासंकारयेत्॥चतुरश्रायांकरणमुच्यतेव्यायामस्तृतीयापार्श्वमानी॥व्यायामसप्तमाति
यंछानी॥एवंकरणंकारयेदित्युच्यते॥एकैकंप्रधिंत्रिधाकृत्वाविभज्यआ– यादितिवक्ष्यकार
येदितियचनादन्येस्तस्मादिभिःप्र–तीरेणनाधंर्युणेत्यवगम्यते॥क्रियंतेनेनेष्टकाइतिकरणंदारुमयं॥
नाएकविंशतिर्भवंति॥तेनकरणेनकृताइष्टकाएकविंशतिर्भवंति॥तस्यागार्हपत्यचितौभवंति
योरते॥प्रागायामाःप्रथमेप्रस्तारेपरस्मिन्नुदगायामाः॥प्रागायामःप्रागायताः॥प्रथमेप्रस्तारे
उदगायातद्वितीयेप्रस्तारे॰एवमुपर्युपरितेभेदोनभवति॥अनेनज्ञायतेसर्वत्रभेदोवर्जनीयइति॥अ

Indira Gandhi National
Centre for the Arts

॥१५॥ यरोत्तरयोः पार्श्वसंधीनां भेद इत्युपदिशंतीति॥ अनेनाचार्येणोक्तमेन ह्यभ्यासं चिनुयादिति॥ मं
डलायाम द्रोदेहे हस्तामध्ये शंकुं निहत्सार्धव्यायामेन सह मंडलं परिलिखेत्॥ यदि मंडला गार्हपत्यचि
तिः स्यात् स्वस्तिकायादिति निपातः॥ उद्धृत्येसे कस्मिन्नर्धे उल्लेपनं कुर्वेति देहे विंशत्यंगुलं कृत्वा तन्मध्ये शं
कुं निहत्सार्धव्यायामेन मंडलं परिलिखेत्तद्व्यायाममात्रं मंडलं भवति॥ केचिदत्र सह शब्दाश्रवणा
दतिशयत्नीयेनेति वर्णयंति क्षेत्रसमत्वाय॥ तदनीप्सितमिति वाचार्यस्यार्धव्यायामेनेति वदतः॥
यदीप्सितमभविष्यत् स्वदोदेहे हस्तामंडलं कुर्यादित्येवावक्ष्यत्॥ उक्तं चादेशादन्य इति तावतीभूमिम
तिव स्यातिचकर्णं सहेति युज्यते॥ योमंडलं चिचीर्षेत् स एवं कृत्वार्धव्यायामेन परिलिखेत्॥ इति नि
पातः एवमध्याहृत्य योजनीयं॥ अथ वाश्वतिरेवेयमेवं॥ तस्मिंश्चतुरश्रं विरचेत्॥ दिक्षु चत्वारि ध
नूंषि भवंति॥ छमवदध्याधावत्सं भवेत्॥ तस्मिन्निति मंडलं परामृशते॥ तस्मिं मंडले चतुरश्रं याव
छरते तावच्चतुरश्रं लिखेत्॥ समपरीणाहं चतुर्धा सं भज्यावांतरदिक्षु लक्षणं कृत्वा ते स्त्रक्तयोय
थाभवंति न था चतुरश्रमालिखेत्॥ दिक्षु चत्वारि धनूंषि भवंति॥ तत्र चाप्यवलिख्य॥ तच्चतुरश्रं ॥१५॥

न [illegible] नवे वलिख्येपि के सप्रमाणेन चतुरश्रं करणं कारयेत् त्रैधमेवैकं प्रधिकं विभजेत्॥ प्रभग्न
नायपरिश्रीयत इति॥ प्रधिकं च पार्श्वधनुः तत्र लक्ष्यति त्वात् प्रधिकमित्युच्यते॥ एकैकं प्रधिकं त्रिधा
कृत्वा विभज्य करणानि कारयेत्॥ चतुर्भिस्तिलैरूनाष्टचत्वा गुलचतुरश्रप्रमाणं मंडलमध्ये तत्स्यात्
तीयेनैवं करणं प्रधिकं मध्ये द्वाविंशतित्रयोदशाभ्यां कारयेत् यथाधनुराकारं यथाव्यापकलक्षयामं
धेति स्तोनमंगुलं भवति तथेतराभिस्त्रिभिस्त्रयोदशांगुलमेकं करणं भरलिमात्रेंति स्याभ्यामेवं
सप्तविंशत्यंगुलमष्टभिस्तिलैरूनमेकं तत्सेत निपुतास्मा सां गंमध्यथाय यथा भवति तथात्रनी
येन करणेन विपर्यस्यान्यं एवमिष्टकाः कारयेत्॥ उपधाने चतुरश्रस्यावांतरदेशान्प्रति स्रक्तीः सं
पादयेत्॥ उपधानकाले प्रथमे प्रस्तारे अवांतरदेशान् कोणदेशान् प्रति चतुरश्रस्य स्रक्तीः संपादये
त् संयोजयेत्॥ चतुरश्रेण नेष्टकाः शेरते प्रधिके षुद्वादशसु नवसु द्वादशसु च एवं विंशतिर्भवंति॥ म
ध्यान्नीतरस्मिन्प्रस्तारे॥ द्वितीये प्रस्तारे मध्यानि चतुरश्रमध्यानि अवांतरदेशं प्रति संपादयेत्॥ यथा
संचिनुयाद्यावतः प्रस्तारांश्चिकीर्षेत्॥ यावतः प्रस्तारांश्चिकीर्षेत् कर्तुमिच्छेत् तावद्भ्यासं चिनुयात्॥

Indira Gandhi National
Centre for the Arts

॥१६॥ यः प्रथमः स तृतीयः पंचमश्च ॥ यो द्वितीयः स चतुर्थः ॥ वितीलमात्रा भवंतीति वितस्त्यानां विज्ञायते ॥
बाह्वोरंतरालं पिशील मिति केचित् ॥ मुष्टिरत्नोरत्निः पिशीलमित्यपरे ॥ प्रादेशं पिशील मित्यन्ये ॥ च
तुरश्र इत्येकेषां ॥ चतुरश्रा धिष्णिया इत्येकेषां श्रुतिः ॥ परिमंडला इत्येकेषां ॥ मदोदेहान्कुर्वात ॥ मदोदे
हा निति प्रदर्शनं तस्मिंश्चतुरश्रमित्यादेः ॥ आग्नीध्रीयं न च धाय्य वलिख्यैव स्यात्स्थाने स्मान्नमु
हानिति ॥ अश्मन्वमाइति सिद्धिर्विएकस्या स्थानइति वचनं इष्टका नामवटे पधानस्यज्ञाथ
पर्यायात् ॥ अश्मन्वमाइति सिद्धे एकस्या स्थान इति वचनं इष्टका नामवटेषु पधानस्यज्ञाथ
नार्थं ॥ व्यक्तमुक्तं बोधायनेन ॥ लोकघाधानि द्व्या एव वटेषूपधेयानीति ॥ यथासंख्यमितरान्य
वलिख्य यथायोगमुपदध्यात् ॥ अग्निकल्पे पाच त्संस्थकाधिष्णिया आम्नातास्ता वत्संख्यानि तान्य
वलिख्यकरणानि कृत्वा यथायोगं यथायुज्यं तेन योपदध्यात् ॥७॥ द्वितीयः पटलः ॥ छ ॥ उक्तानिह
विर्यज्ञानां विहाराणि सौमिकानि च ॥ साग्निचित्यस्य क्रतोरग्नि क्षेत्रमानमिष्टका करणानि उपधान
विधिश्चनोक्तः ॥ तदुच्यताम् प्रस्तौति ॥ भवतीचरवलु वाएष योग्निंचिनुत इति विज्ञायते ॥ प्रस्ताव
नात्रमनपाश्रयात्क्रियते ॥ नफलविधानं ॥ विधिविभक्तेरभावात् ॥ निसोग्निरुत्तरवेदिवत् ॥ अग्नि ॥१६॥

योम उत्तरवेदिरुत्तरेषु क्रतुष्वग्निरिति निसवचनात् ॥ पादप्रस्तावो नयाश्रयात्क्रियते तदा गार्ह
पत्यचितेः पूर्वमेव प्रस्तावः कर्तव्यः ॥ सत्यमेतत् ॥ इह प्रस्तावचनं स्यैतत्प्रयोजनं वक्ष्यमाणाः नि
धर्माणि महाग्नेरेव यथास्युः ॥ — — — — तज्ज्ञानुदघादयो महाग्नेरेवेति केलायनीयेष्वुक्तं महाग्नेरेव
न धर्मा इति स्पष्टमुक्तं ॥ किं चास्यैवास्यैग्निशब्देन उपपदेन चोदिता धर्मा यथास्युरिति ॥ यथा तेचाए
ते यजमान एवाग्निं चिन्वीतेति यजमानो महाग्नेरेव कर्तानगार्हपत्यादेः गार्हपत्यधिष्णिया नामध्वर्युरे
व कर्ता पश्चाद्विधानव्यानां धिष्णियानां पूर्वं विधानस्येतत्प्रयोजनं योगैश्चैतास भवंस्येव ॥ यद्यपि
बहवोश्नात्स्याइति क्रियतेन याश्रया ॥ वयसां वा एष प्रतिमया चीयत इत्याकृति चोदना ॥ वयसांप
क्षिणामेषोग्निः प्रतिमया प्रतिरूपा चेन व्यइत्याकृतेः स्वरूपस्य विधानं अनयाश्रयात्क्रियते ॥ स चो
स्य तत्रोच्छायपेसर्यं इति बोधायनोक्तं ॥ वै शब्दो निश्चये ॥ असावं — माचार्यो वक्ष्यति बक्रपक्षो व्यस्त
पुच्छ इति ॥ तस्माच्छ्येनचिदेव नित्यः ॥ श्रुत्यंतरे चोक्तं श्येनचिदग्नीनां प्रथमोग्निरिति ॥ ननु यदि श्येनो नित्यः
कथं स्वर्गकाम इति ॥ यूपदव्यवत् ॥ यथा खादिरं स्वर्गकामस्येति खादिरस्य नित्यत्वं काम्यत्वं च ॥ प्रसक्तवि

Indira Gandhi National
Centre for the Arts

॥५७॥ धानाहुत्या वदाम्नानेन ॥ वाशब्दः पक्षव्यावृत्तौ नेनैषा आकृतिचोदना नापि श्येनः प्रकृतिः कुतः प्रस
क्तविधानान् प्रत्यक्षमेवात्र विधीयते पक्षी भवतीत्यारभ्य पक्षपुच्छानामपि प्रमाणं छिद्यते नेन विरोधा
त् ॥ ननु श्येनाकृतिचोदनेति नैषा चोदना नापि विधिः ॥ विधिविभक्तेरभावात् चीयत इति निर्दिश्यते
ननु चिनुयाच्चेतव्यमिति वा ॥ विध्यंतरशेषभूतत्वाच्च पक्षवाक्यमेतन्न विधायिके ति ॥ ब्रह्मवादिनो वदंति न्यङुः
अग्निश्चेतव्या ३ उत्तानाः ३ इत्यारभ्य प्राचीनमुत्तानं पुरुषशीर्षमुपदधातीति पुरुषशिरउपदैधानं विधीयते न
त्रिशेषभूतमिदं न विधायकं ॥ श्येनाचिदग्नीनां प्रथमइति कंक श्येनमधिकृत्य तदुक्तं पुरुषमात्रीपक्षपुच्छ
स्य मम रव्या श्येन इति न तस्माद विरोधः ॥ यावदाम्नानेता वदेव सारूप्यं पक्षपुच्छयत्तया सारूप्यं गृहीता वयः श
ब्दो वर्तते तस्मात्पुरुषमात्रपक्षपुच्छ अग्निरिति नमेव प्रकृतिं निश्चित्यान्ये प्रकृतिविशेषा वक्रपक्षादयः का
म्या इति सिद्धं ॥ वक्ष्यति काम्या गुणविकारा इति ॥ वेणुना चतुर आत्मनि पुरुषान् चमिमीते ॥ अग्निकल्पे उ
क्तलक्षणेन वेणुना मिमीतेति मिनोति ॥ खंडि सार्थ पक्षेत्रं वक्ष्यमाणेन मार्गेण सर्वतोऽपि पुरुष आत्मा ॥ द्वाभ्यां
चत्वारीति वचनाच्चत्वारि पुरुष पक्षेत्राण्यात्मनि ॥ पुरुषं दक्षिणे पक्षे पुरुषं पुच्छे पुरुषमुत्तरे ॥ पुरुषमेव दक्षिणे ॥५७॥

पक्षे पुरुषं पुच्छे पुरुषमुत्तरे ॥ एवं त्रीणि चतुरश्राणि पुरुषप्रमाणानि आत्मना सह सप्तपुरुषक्षेत्राणि ॥ अर
त्निना दक्षिणतो दक्षिणं पक्षं प्रवर्धयत्येवमुत्तरत उत्तरं ॥ अरत्निप्रमाणेन दक्षिणतः दक्षिणं पक्षं वर्धयीद
दीर्घकरोति ॥ उत्तरतश्चोत्तरं ॥ प्रादेशेन वितस्त्या वा पश्चात्पुच्छं ॥ द्वादशांगुलेन त्रयोदशांगुलेन वा पश्चात्पु
च्छं वर्धयेदिति शेषः ॥ एवमर्धाष्टमानि पुरुषक्षेत्राणि भवंति ॥ एकविधः प्रथमोऽग्निर्द्विविधो द्वितीयस्त्रिवि
धस्तृतीयस्त एवमेवोद्यं येकशतविधात् ॥ एकविधः एकपुरुषः ॥ एकोत्तरं चिन्वीतेति प्रथमातिक्रमेका
रण ॥ यात् इति ॥ प्रथम एकपुरुषः ॥ विधाइष्टका ॥ अस्मिन् विधीयंत इति अग्निक्षेत्रं ॥ आतश्चोपसर्गइ
तिकः ॥ एका चासौ विधा च एकविधा एकपुरुषइत्यर्थः ॥ अधिकृतत्वात्पुरुषस्य ॥ एवं सर्वत्र योजनीयं ॥ उद्यं
ति गच्छंति आएकशतविधात् एकविधः एकपुरुषः ॥ एकोत्तरं चिन्वीतेति ॥ प्रथमातिक्रमे कारणाभावा
दिति प्रथम एकपुरुषः ॥ विधाइष्टका अस्मिन् विधीयंत इति अग्निक्षेत्रं ॥ आतश्चोपसर्गइत्यभिविधावाङ् ॥
तद्रूहवै सप्तविधमेव चिन्वीत ॥ निपातसमूहः पक्षव्यावृत्तौ ॥ एकविधादयो न चेतव्या इति ॥ सप्तविधो वाव
प्राकृतोऽग्निस्ततऊर्ध्वमेकोत्तरानिति विज्ञायते ॥ वाव इत्यवधारणे ॥ सप्तविध एव प्राकृतोऽग्निः ॥ प्रकृतिरित्यर्थः ॥

सप्तार्ध एव प्रथमः प्रकृतिश्च॥ पु
॥१८॥ स्वार्थ एव तद्धितः॥ सप्तविधादूर्ध्वमेकोत्तराणीति वाजसनेयिनां श्रुतिः॥ सप्तार्ध एव प्रथमः प्रकृतिश्च॥ पु
रुषमात्रेणेत्यारभ्य सप्तार्धस्य विधानात् उपधानविधौ च दक्षिणे पक्ष उपदधातीति श्रूयते॥ तत ऊर्ध्वमे
कोत्तराणीति एकपुरुषाधिका परिमितिः॥ द्वितीये प्रयोगे अर्धनवमं तृतीये अर्धदशममित्येवं द्रष्टव्यं॥ वाजस
नेयकमिति अग्निकल्पे विधानाद्विकल्पः॥ सप्तार्धमपि द्वितीये॥ द्वितीये व्याहारे चिन्वीतेति तदपि लभ्यते॥
एकविधप्रभृतीनां न पक्षपुच्छानि भवंति॥ इति संप्रश्यामः सप्तार्धविध एव चेतव्य इति॥ यस्मादेकवि
धप्रभृतीनां षड्विधपर्यंतानां न पक्षपुच्छानि भवंति॥ किमुक्तं भवति॥ यतः पक्षपुच्छानि न भवंति तेषु
नशोरनइसर्थः॥ कुत इत्याह॥ सप्तविधवाक्यशेषत्वात्॥ सप्तविधमग्निं प्रकृत्य विधीयत इत्यर्थः॥ रथंत
रं दक्षिणे पक्ष उपदधाति बृहदुत्तरे पक्ष इत्यादिरेव मादयोन विनियुज्यंते॥ तस्मात्स चेतव्या एकविधा
दयः॥ सप्तविध एव चेतव्यः॥ ते ह्यपि पक्षपुच्छानि किमिति न क्रियेरन्नित आह॥ श्रुतिविप्रतिषेधादिति व्याया
मे षोपि प्रतिषेधः॥ यद्येकविधस्य पक्षपुच्छप्रमाणं व्यायाममात्रं नाहीयते॥ अथैष दोषो न भवेदिति व्याया
ममात्रता पक्षपुच्छात्मनां गृह्येत नतदेकविधत्वं हीयेत॥ तस्माद्विरोधः॥ अतश्च विरोधान्न कर्त्तव्या एकविधादयः॥
॥१८॥

षड्विधपर्यंताः॥ कथमष्टविधादयो मातव्या इत्यत आह॥ अष्टविधप्रभृतीनां यदन्यत्सप्तभ्यस्तत्सप्तधा विभज्य
प्रतिपुरुषमावेशयेत्॥ अष्टविधप्रभृतीनामेकशतपर्यंतानां यदन्यत्सप्तभ्यः सप्तार्धेभ्यः तत्सप्तधा सप्तार्धधा॥
सप्तार्धेभ्य इति वृत्त एव तल्लभ्यते सप्तविध इत्यु
यदन्यत्सप्तार्धेभ्यः प्रक्षेप्तव्यमासीत तत्सार्धसप्तधा विभज्य॥ सप्तार्धेभ्य इति वृत एव तल्लभ्यते सप्तविध इत्यु
क्तेर्ध्याष्टम एव गृह्यते॥ अरत्निप्रादेशानां तदंगत्वात्॥ वक्ष्यति च सप्तविंशतिविधस्त्रविध इति अष्टविध एकः प्रक्षेप्त
व्यः॥ नवविधे द्वौ॥ दशविधे त्रय इत्येवं द्रष्टव्यमेकशतविधात्॥ पुरुषं सप्तार्धधा विभज्य कृत्वा प्रतिपुरुषमे
कोभागः प्रक्षेप्तव्यः॥ सप्तसार्धपंचारत्निप्रादेशाः पुरुषे २ त्रिंशत् २ पंचदशभागीयाः॥ अर्धपुरुषे पंचदश॥ ए
वमेकस्मिन्पुरुषक्षेत्रे द्वे शते पंचविंशतिश्च पंचदशभागीयाः शेरते॥ अष्टविधेताः प्रक्षेप्तव्याः॥ एकस्मिन्पुरु
षक्षेत्रे त्रिंशत्पंचदशभागीयाः प्रक्षेप्तव्याः तासु प्रक्षिप्तासु पंचपंचाशदशदधिकं शतद्वयमापद्यते॥ षोडशानां
वा — पंचाशदधिकं यच्चतुरश्रमित्यनेन न्यायेन एकस्मिन्पंचदशभागीयक्षेत्रे प्रनीते यारत्नुः सा पुरुषस्य
नीया॥ तस्याः पंचमो भागो रत्निस्थानीयः॥ तेनानेन कृते सर्वपुरुषक्षेत्रं मिलितं भवति॥ एवं नवविधादिषु
द्रष्टव्यं॥ आकृतिविकारस्याश्रुतत्वात्॥ यदि पुरुषक्षेत्रमेकत्र प्रक्षिप्यते विक्रियेताकृतिः॥ विद्यते श्रुतिर्यस्याः सा

॥१९॥ अश्रुतिः आत्मनि विकारस्याश्रुतेरभावादित्यर्थः॥ पुरुषमात्रेण विमिमीते वेणुना विमिमीत इति विज्ञायते॥
पुरुषमात्रेणेति द्वयमपेक्षते॥ वेणुनेति च मात्रामपेक्षते तयोर्नष्टाश्वदग्धरथवत्संबंधः॥ पुरुषमात्रेण वेणु
नेति॥ यावान्यजमान ऊर्ध्वबाहुस्तावदंतराले वेणोश्छिद्रे करोति॥ यजमानग्रहणादध्वर्युप्रमाणो वेणु
र्न गृह्यते॥ छिद्रयोरंतरालं यजमानमात्रं यथा भवति तथा छिद्रे करोति॥ मध्ये तृतीयं॥ तयोर्मध्ये वेणो
श्छिद्रमेकं करोतीति शेषः॥ अपरेण यूपावटमनुपृष्ठ्यं वेणुं निधाय॥ संचरस्य पश्चादनुपृष्ठ्यं पृष्ठ्या यथा
तथा वेणुं निधाय॥ छिद्रेषु शंकुं निहत्य सोन्मुच्यापराभ्यां दक्षिणाप्राक् परिलिखेदंतात्॥ त्रिषु छिद्रेषु शंकून्नि
हत्यापराभ्यां शंकुभ्यामुन्मुच्य दक्षिणाप्रसव्यं परिलिखेदंतात् अग्निक्षेत्रात्॥ उन्मुच्य पूर्वस्मादपरस्मि
न्प्रतिमुच्य॥८॥ दक्षिणाप्रसव्यं परिलिखेदंतात्॥ पूर्वस्माच्छंकोरुन्मुच्यापरस्मिन्प्रतिमुच्य दक्षिणाप्रसव्यं
परिलिखेदंतात्॥ उन्मुच्य वेणुं मध्यमे शंकावंसवेणोश्छिद्रं प्रतिमुच्योपर्युपरि लेखासमरं दक्षिणावेणुं
निधायांसे छिद्रे शंकुं निहत्य तस्मिन्मध्यमं वेणोश्छिद्रं प्रतिमुच्य लेखांतयोरितरे प्रतिष्ठाप्य छिद्रयोः शंकू
न्निहंति स पुरुषश्चतुरश्रः॥ दक्षिणे शंकावंसमन्यतरवेणोश्छिद्रं प्रतिमुच्योपर्युपरि लेखासमरं दक्षिणा ॥१९॥

यं वेणुं निधायांसच्छिद्रे शंकुं निहत्य तस्मिन् शंकौ मध्यमं वेणोश्छिद्रं प्रतिमुच्य लेखांतयोरितरे छिद्रे प्रतिष्ठाप्य छि
द्रयोर्लेखांतयोरेव शंकू निहंति स चतुरश्रः पुरुषः॥ एवं प्रदक्षिणं चतुर आत्मनि पुरुषानभिमिमीते॥ एवं चत्वा
रि पुरुषक्षेत्राणि आत्मनि यथा भवंति तथा प्रदक्षिणं मिनुयात्॥ पुरुषं दक्षिणे पक्षे पुरुषं पुच्छे पुरुषमुत्तरे॥
दक्षिणे पक्षे दक्षिणे पार्श्वे मध्यमे त्रिषु त्रिषु वेणुं प्रतिमुच्य उन्मुच्यापराभ्यामित्यादि पूर्ववत्॥ चतुरश्रः पुरु
षः॥ एवमुत्तरं पक्षमुत्तरपार्श्वे मध्यमेष्वेव त्रिषु प्रतिमुच्योत्तरं पुरुषं॥ पश्चान्मध्यमशंकौ मध्यमं वेणोश्छि
द्रं प्रतिमुच्य तिर्यग्वेणुं निधाय छिद्रयोः शंकू निहत्य सोन्मुच्योत्तराभ्यां प्रसव्यं परिलिखेत् दक्षिणस्मादुन्मुच्योत्त
रस्मिन् पुरुषमात्रे शंकौ प्रतिमुच्यौ यच्छिद्रे शंकुं निहत्य तस्मिन् पुरुषं चतुरश्राक्ष्णयासमं वेणुं निधाय [illegible] ५
प्रदक्षिणं परिलिखेत्॥ उन्मुच्य वेणुं मध्यमे प्रतिमुच्य उपर्युपरि लेखासमरं पश्चाद्वेणुं निधायांसे इत्यादि समा
नं तत्सुखं॥ अरत्निना दक्षिणतो दक्षिणं पक्षमिति सुत्तं॥ मतमेतत्॥ पृष्ठ्यांते चापुरुषमात्रस्याक्ष्णया वेणुं निधा
य पूर्वस्मिन्निंतरं ताभ्यां दक्षिणम् [illegible] संनिहरेत्॥ अपरेण यूपावटदेशं संचरमवशिष्य शंकुं निहत्य तस्मात्पुरुष
मात्रे शंकुं निहत्य तस्मिन्पुरुषचतुरश्राक्ष्णयासमं वेणुं निधाय प्रतिमुच्य वा पूर्वस्मिंश्छंकावितरं पुरुषमात्रं वेणुं



Indira Gandhi National
Centre for the Arts

॥२०॥ निधायप्रतिमुच्य वानाभ्यां दक्षिणमंसं निर्हरेत्॥ विपर्यस्यश्रोत्यौ॥ अपरस्मिंश्छेके पुरुषमात्रं प्रतिमुच्य
पूर्वस्मिन्पुरुषचतुरश्रस्याक्ष्णया समं प्रतिमुच्याद्दक्षिणां श्रोणिं मुदगपसार्येतरस्मिन्वंश्रोणीं विहरेत्॥ पूर्ववदुत्तर
मंसं॥ गतं मेतत्॥ रज्ज्वा वा विमायोत्तरवेदिन्याये नवेणुनाविमिमीते॥ रज्ज्वान्यतरयां विमायोत्तरवेदिवद्वेणु
नापश्चाद्विमिमीते॥ दृष्टार्थं॥ सपक्षपुच्छेषु विधाभ्यासे पच येच विधासप्तमकरणीं पुरुषस्थानीयां कृत्वा विहरेत्॥
विधाभ्यासो ष्टविधप्रभृतियो वा विधा पचषुय एकविधादृष्टस्ते च्छेकविधादिषु विधासप्तमकरणीयेन वेणु
ना विमिमीते न दर्धाष्टमं भवति॥ पुरुषस्थानीयस्य चं चतुरश्रं कृत्वा पूर्ववद्विभज्य विहरेत्॥ सपक्षपुरुषे विधिति
वचनं अयं विधार्ये ते च्छेकविधादिरूपेना द्विषु त्रि यमाणेषु यद्येकविधानसंचदशधा विभज्य द्वौ भागौ समस्य
चतुरश्रं कृत्वा तस्य भागो वेणुनाग्रहीयात्॥ सपुरुषस्थानीयः एवं सर्वत्र यावद्विधातस्ये च्चं समचतुरश्रं
कृत्वा पूर्ववद्विभज्य समचतुरश्रं कृत्वा तस्य प्रमाणं ग्रहीयात्॥ दश वा चत्वारि सहस्राण्यशीतिर्त्रिचयर्गाः
पुरुषस्तेषां वर्गः॥ एका कोटिः षट् प्रयुतानि चत्वार्ययुतानि षट् सहस्राणि चत्वारिंशतानि॥ यद्यष्टविधः
अपभिर्गुणित्वा पूर्वासा स्यासंयोज्य लब्धं द्वाहस मूलं ग्रहीयात्॥ सतस्य पुरुषो भवति॥ अपचयेवर्ध
॥२०॥

संयोगो नास्ति॥ अरत्नि प्रादेशा भावान्॥ अन्यत्समुच्चयेन तुल्यं अर्धतिले न पाद तिले न वाङ्गने
अधिके न वा दोषो भवति॥ विशेषदर्शनात्॥ मत्रश्लोकः॥ आकाशवरखंबरवेदवर्गमिष प्रवदन्तिधि
र्धिभक्तं॥ लब्धस्य च हृस्ययमेन मूलं सदा भवेत्साप चयेच दिति॥ नचैकविधादयो पक्षपुच्छा कर्तव्या
इति प्रतिपादितं॥ महताप्रयत्नेन हेतुदर्शनेन॥ ससमेतत्॥ कर्तव्या एकविधादय इति कृत्वान्वितेषा॥ यद्येकविधा
दयः कर्तव्याः तदाकृत्वर्थतयोपादीयते तदाश्येनादय आकृतिविकाराः पुरुषार्थाः संतस्तद्विकृत्यादिशायेरन्॥
यथा पुरुषमात्रतां विकृयपक्षपुच्छ। नां ससप्तधा विधेश्येनादयो वर्तंते एवं पुरुषमपि विकृत्यैकविधादिषु निवि
यथापुरुषमात्रतां विकृयपक्षपुच्छ। नां सप्तधा विधेश्येनादयो वर्तंते अष्टविध प्रभृतीनामपि मार्गांतरेण विधाना
शेरन्॥ तत्रयदासपक्षपुच्छत्वमेकविधादीनां तदायं विधिरिति अष्टविध प्रभृतीनामपि मार्गांतरेण विधाना
त्॥ प्रडगादिवाक विधादयो नसंतिना चयोंपि द्वितिकल्पंति॥ सारत्नी प्रादेश इति वचनात्॥ करणानी
त्॥ प्रडगादिवाक विधादयो नसंतिना चयोपि द्वितिकल्पंति॥ सारत्नी प्रादेश इति वचनात्॥ करणानी
षकानां पुरुषस्य पंचमेन कारयेत्॥ इष्टकानां करणानि वक्ष्याम इति शेषः॥ पुरुषस्य पंचमेनारत्निनाका
रयेत्॥ तासामेवैकतोध्यर्धास्तद्वितीयं॥ तासामेवेष्टकानां कति पयाएकतो अध्यर्धाः सार्धेनाधिकोस्तासां
करणं द्वितीयं त्रींप्रादेश पार्श्वमानी अरत्निमात्रा तिर्यङ्मानी द्वितीयस्य करणस्य॥ पुरुषस्य पंचमो भाग

२८

Indira Gandhi National
Centre for the Arts

॥२१॥ एकतः प्रादेशएवतस्तत्तृतीयं॥ अरत्निः पार्श्वमानीप्रादेशस्तिर्यङ्मानीतत्तृतीयंकरणं॥ सर्वतः प्रादेश
स्तच्चतुर्थं॥ सर्वतः प्रादेशस्तच्चतुर्थंकरणं॥ समचतुरस्राः पंचदशभागीयास्तत्पंचमं॥ अष्टांगुलेनका
रितास्तत्पंचमंकरणं॥ समचतुरस्राः किमर्थंनत्राह॥ समग्रहणं यस्मिन्नग्नौसमचतुरस्राएवेष्टकाः तत्रा
प्यासामप्रवेशोयथास्यादित्येवमर्थं॥ वक्ष्यतिच अएरकाः पंचदशभागीयानांस्थानइति॥ अएरकपंचदश
भागीययोरेकविषयत्वं॥ ऊर्ध्वप्रमाणमिष्टकानांजान्वोः पंचमेनकारयेत्॥ इष्टकानामूर्ध्वप्रमाणंजानु
प्रमाणपंचमं॥ द्वात्रिंशदंगुलंजानुतस्यपंचमभागेनत्रयोदशतिलाधिकेनषडंगुलेनकारयेत्॥ महाग्ने
रिष्टकानामेवैतन्महाग्नेः करणान्निर्दिश्यतइतिविधानात्॥ अर्धेननाकसदांपंचचोडानांच॥ जानु
पंचमार्धेननाकसदांपंचचोडानांचोत्सेधः॥ सप्ततिलाधिकांगुलित्रयोत्सेधेनकारयेत्॥ यस्यचमाना
नांप्रतिह्रासेनपुरीषेणनत्संपूरयेत्॥ पच्यमानानामिष्टकानामुत्सेधनः परिमाणतश्च्प्रतिह्रासोभवेत्
तत्पुरीषेणपूरयेत्॥ कुतइत्याह॥ अनियतपरिमाणत्वात्पुरीषस्य॥ यत् परिमाणइष्टकाअनियतपरि
माणंपुरीषंइयदेतत्पुरीषप्रक्षेपस्यमितिनियमाभावात्॥ तेनैवपूरयितव्यं॥ ९॥ उपधानेऽस्यर्धाहःपुरस्ता
॥२१॥

प्रतीचीरात्मन्नुपदधाति॥ प्रतीचीः प्रत्यगायताः॥ दशपश्चात्प्राचीः॥ प्राचीः प्रागायताः॥ पंचपंचपक्षाग्र
योस्तथाप्ययोश्च विंशयास्तासामर्धेष्टकामात्राणिपक्षयोर्भवंति॥ पंचपंचपक्षाग्रयोः दक्षिणायतउद
गायताश्च॥ विंशयाश्चपंचचोदगायताः दक्षिणायताश्च इष्टकाशब्देनपंचमभागीयाएवगृह्यंते॥ नाध्य
र्धाः॥ विपरीतात्रप्ययइतिलिंगात्॥ पंचपंचपार्श्वयोर्दक्षिणउदीचीश्च॥ पंचपंचाध्यर्धादक्षिणायताउद
गायताश्चयथात्मसमीपेप्रादेशमात्रमवशिष्यतेतथोपधेयाः॥ पुच्छेप्रादेशमुपधाय॥ आत्मसमीपेयदवशि
ष्टंतत्प्रादेशमात्रमर्धेष्टकाद्वयंमध्येअभितः षट्प्रादेशाषट्तिस्यावर्धनमुक्तं॥ कथंप्रादेशमुपधायेत्युक्तं॥
सर्वमग्निंपंचमभागीयाभिः प्रच्छादयेत्॥ पंचदशाध्यर्धाः स्तत्रोक्ताः पुच्छेर्धेष्टकाद्वयंप्रादेशाः षडित्यनेन॥
सर्वमग्निंसेतुंप्रथमकरणसंपादिताभिः प्रच्छादयेत्॥ दशोत्तरंशतंपंचमभागीयाः शेरते॥ पूर्वाभिः स
हषष्ठ्यधिकंशतं॥ पंचदशभागीयाभिः संख्यापूरयेत्॥ एकस्मिन्पंचमभागीयास्थानेत्रेनवपंचदशभागीयाः
शेरते॥ चतस्रः पंचमभागीयानवधानिमज्यमत्र कापिपंचदशभागीयाः प्रक्षेप्तव्याः॥ नवधामध्योपधानसो
कर्यार्थंप्रदेशउच्यते॥ आत्मनिद्विनीयरीत्यामध्येद्वयमपहायाष्टादशाव्यंशारीत्यामष्टादश॥ एवंद्विशतः प्रस्तारः॥

Indira Gandhi National
Centre for the Arts

पुरस्ताच्च पंच प्रागायताः॥ उत्तरे पक्षे चैव प्रागायताः प्रागायतास्त्र पुच्छाप्यये अध्यर्धाः पंच प्रागायताः॥४
॥२२॥ अपरस्मिन्प्रस्तारे ध्यर्धा दश दक्षिणतउदीचीरात्मन्नुपदधाति दशोत्तरतो दक्षिणा॥ आत्मनि दक्षिणतउदी
चीः उदगायताः दशाध्यर्धा उपदधाति॥ आत्मन्येव दशोत्तरतो ध्यर्धा दक्षिणायताः॥ यथा प्रथमे प्रस्तारे पक्षौ
न पापुच्छं यथापुच्छं तथा पक्षौ विपरीता अप्यये॥ पुच्छाग्ने पंचाध्यर्धाः प्रागायताः दक्षिणे पक्षे पश्चात्पंच प्राग
यताः तासां मध्ये कामात्राण्यात्मनि भवति॥ एवं विपरीता अप्ययेनासां पुरस्ताद्दशार्धेष्वकाउदीच्यः॥ सर्व
मग्निं पंचमभागीयाभिः प्रच्छादयेत् सदशभागीयाभिः संख्यां पूरयेत्॥ गतमेतत्॥ पूर्ववद्विशतः प्रस्तारः॥
यसा संचिनुयाद्यावतः प्रस्तारां श्चिकीर्षेत्॥ गतमेतत्॥ पंचचितयो भवति पंचभिः पुरीषैरभ्यूहती
ति पुरीषांतां चितिरर्थांतरत्वात्पुरीषस्य॥ पंचचितयो भवंति पंचभिः पुरीषैरभ्यूहतीत्यस्याः श्रुतेरयमर्थः
पुरीषांतां चितिरिति॥ कुतः अर्थांतरत्वात्पुरीषस्य॥ इष्टकासंधानार्थं पुरीषं तस्मात्तदंतां चितिः॥ तदर्थंता
च द्रूहेण गृह्यते॥ जानदघ्नं साहस्रं चिन्वीत प्रथमं चिन्वानः॥ यः प्रथमं चिनोति स ताउद्दघ्नं चिनुयात्॥
सहस्रसंख्या युतश्च महाग्निमेवा– सविधानात्॥ नद्यारत्नामुरवीपदचिज्ञि यानोरसहस्रसंख्यायामंतर्भा
वः॥ नाभिजानुदघ्नता॥ नाभिदघ्नं द्विषाहस्रं द्वितीयं॥ नाभिप्रमाणमुत्सेधतः द्विषासहस्रं द्वितीयं॥ ॥२३॥

आस्यदघ्नं त्रिषासहस्रं तृतीयं॥ आस्यप्रमाणं तृतीयं चिन्वानः त्रिषाहस्रं च ग्रीवदघ्नमिसस्मद्दीयाश्रुतिः॥
उत्तरमुत्तरं ज्यायांसं महांतं बृहंतमपरिमितं सर्वकामश्चिन्वीतेति विज्ञायते॥ उत्तरमुत्तरमाहारमाहरेत्॥
ज्यायान्वेदाभ्यासेन महानुत्सेधतः बृहत्परिमाणतः॥ अपरिमितं साहस्रादिभ्यः॥ स्वर्गकामस्य चितिः॥
स्वर्गकाम इति वचनादग्निकल्पे वाजसनेयकमिति बह्वृचानां कल्पः॥ द्विषाहस्रो द्विप्रस्तारश्चितयो
भवति त्रिषाहस्रस्त्रिप्रस्ताराः॥ निगदव्याख्यानमेतत्॥ चतुर्थप्रभृति घाहारे पुनिस्याभि एकापरि
माणं॥ इष्टकापरिमाणमिह त्रिषाहस्राभिस्तूच्यते॥ त्रिषाहस्रमेव नियतं॥ यदीदं नोत्पत्स्यनीक
वदावृत्तिस्यात्॥ अन्यस्याविधानात्॥ अमुमेवार्थं दर्शयितुं श्रुतिर्दर्शयति॥ विज्ञायते च न ज्या
यांसं संचित्य कनीयांसं चिन्वीतेति॥ ज्यायांसं द्विषाहस्रं त्रिषाहस्रं चित्वा कनीयांसं साहस्रं
चिनुयादिति प्रतिषेधः॥१०॥ ॥तृतीयः पटलः॥३॥ ॥ चतुरश्राभिरग्निं चिनुत इति विज्ञायते॥
अस्याः श्रुतेरर्थः किं– नेकिं समानानां चतुरश्राणां दीर्घाणां चाविशेषग्रहणं आहोस्वित्समानामेवे
ति॥ कुतः विशेषाश्रवणात्॥ न हि कश्चिद्विशेषः॥ श्रूयते तस्मादविशेषेणेति प्राप्त उच्यते॥ समचतुरश्रा

Indira Gandhi National
Centre for the Arts

॥२२॥ अनुपपद्यत्वाच्छब्दस्य॥ समचतुरस्रा एव ग्राह्याः॥ कुतः॥ अनुपपद्यत्वाच्छब्दस्य॥ यत्रोपपद्यं न श्रूयते
दीर्घो विषम इति वा तत्र समचतुरस्र एव॥ मुख्यत्वात् मुख्ये चैव प्रथमं प्रत्ययो भवति॥ यतः प्रतीयते स तस्या
र्थो भवति॥ इतरत्र गौणः॥ समचतुरस्राभिरेवोपाय — व्यः॥ नाध्यर्धाभिरिति स्थितं॥ पादमात्र्यो भवेस
र त्निमात्र्यो र्भागस्यएकं पंचमभागीयास्त्रिभवं सुर्यस्थिमात्र्यो भवेसणूकमात्र्यो भवंतीति विज्ञायते॥ अणव
चतस्र एताः प्रकृतयस्ताः स्वयमेव व्याचष्टे॥ चतुर्भागीयाण्वं पंचमभागीयारत्निस्त्रयोर्वेस्थि॥ अणव
शब्दः पुरुषचतुर्थस्य वाचकः॥ अरत्निः पंचमस्य॥ तथा ते नैव प्रकारेणोर्वेस्थि॥ षष्ठस्य षड्भागीया इति श्रु
त्यंतरे॥ पादेष्टका पादमात्रीतत्र पाद्या चत्वारीशब्दार्थस्य विशयित्वात्॥ चतुर्भागीयाः पाद इति संज्ञाविहिता
शत्यंतरे पादशब्दे न प्रमाणं चतुर्थभागो गृह्यते॥ क्षेत्रचतुर्भागश्च पादप्रमाणं तस्याः सा पादमात्रीया
दृशब्दस्य संबंधिशब्दत्वात्पुरुषचतुर्भागो गृह्यते॥ अणूकादि चतुर्भागसन्निहितत्वात्तेषां पादेष्टकाभिर्मि
रित्युक्तं॥ पुरुषचतुर्भागा अणूकादिचतुर्भागास्त्र प्रतीयंते कुतः॥ शब्दार्थस्य विशयित्वात्॥ वक्ष्यति चा॥
अणूकाः पंचदशभागीयानां स्थान इति॥ संख्यापूरणे अणूकानां प्रादेशं दर्शयति॥ ऊर्वस्थ्यरत्न्योरेवार्थे ॥२३॥

त्वं के चिदिष्टकितिने पंचदशभागीयाभिः संख्यापूरणं कुर्वंति॥ तेषां दर्शने प्रस्तारा न युज्यंते॥ सहस्रसंख्यानुपूर्व
ते॥ प्रविप्रस्तारये दिति वचनमनर्थकमापद्यते॥ ये प्रस्तारास्ते द्विशता इति वचनात्॥ न ट युज्यंते तस्मात्पूर्वो
क्त इति न्यायः॥ सर्ववचनामर्थवत्त्वाय॥ उपधाने त्वाष्टोपादेष्टकाश्चतुर्भागीयानां पक्षाग्रयोर्निदध्यात्॥
उपधानकाले अष्टावर्षोश्चतुर्भागीयानां पादेष्टकाः पक्षाग्रयोरुपदध्यात्॥ संध्योश्च न द्वादशान २ षडंगु
लोपेताः॥ अष्टावष्टावितिताविधेयाः॥ आत्मावंषडंगुलमात्रमचेताः॥ अवगताः॥ प्रक्षयीइतियावत॥
नवांगुलमात्रे पक्षयोः॥ श्रोण्य २ सेषु चाष्टौ प्राचीः प्रतीचीश्च॥ श्रोण्यंसयोश्च तत्र तत्र पादाः
प्राचीः श्रोण्योरंसयोः प्रतीचीः एवं चतुर्भागीयपादाः अष्टचत्वारि २ शत॥ संध्यंतराले पंचमभागीयाः
सपादाः॥ पक्षसंध्यंतरयोरंतराले पंचमभागीयाः पादसहिताः मध्ये पाद दश प्रतीचीतासां दक्षिणतः पं
चविंशतिः पंचमभागीयाः उत्तरतो विंशतिः॥ एवं संध्यंतराले पंचपंचाशदिष्टकाः॥ पुच्छे प्रादेशमुपधायः॥
प्रादेशशब्दे न किं क्षेत्रमभिधीयते॥ पुच्छे पत्प्रादेशमिति॥ अथवा इष्टकाः प्रादेशेन कारिताः यदि क्षेत्रमभि
धीयेत प्रादेशक्षेत्रे प्रादेशं पंक्ति रेवोपधातव्यास्यात्॥ तथासति भिद्येताग्निरितरस्मिन्पक्षे प्रधानमिष्टान

Indira Gandhi National
Centre for the Arts

॥२४॥ याप्रादेशाइष्टकाभवेयुः॥ प्रादेशमितिजानातेव वचनं॥ प्रादेशाष्टकाभिः सहाणूकानशेरते॥ शेरतेतुपंच
मभागीयाताभिः सह॥ अतश्चतस्रश्चतस्रः श्रोण्योः पादेष्टकाः त्रयोदशपंचमभागीयाः पूर्वार्धेऽष्टा
वएष्टकाः॥ एषमेकोनत्रिंशत्पुच्छे॥ अपरेपुनरेवंवर्णयंति॥ यस्मिन्बिनस्सावर्धनंकृतेन त्रापिचतुरस्रस्र
तिसामर्थ्यात्प्रादेशाएवेष्टकाभिर्व्याप्यतइति॥ एवमर्धप्रादेशग्रहणमिति॥ तस्मिन्नपिपक्षे उक्तउपधान
क्रमः॥ सर्वमग्निंचतुर्भागीयाभिः प्रच्छादयेत्॥ पक्षयोर्द्वात्रिंशत्॥ अष्टाविंशतिरात्मन्युक्ताः॥ पादेष्टका
भिः संख्यापूरयेत्॥ पंचदशभागीयाभिः संख्यांपूरयेत्॥ आत्मनितृतीयायांरीतौमध्यमांपंचमभागी
यामुक्तसएवंद्विशतः प्रस्तारः॥ अपरस्मिन्प्रस्तारेपुच्छाप्ययेपंचमभागीयाविशायाः॥ पुच्छाप्ययेविशायाः
उभयस्थाः पंचमभागीयाउपधेयाः॥ ता आत्मनिचतुर्दशभिः पादेयथायोगंपर्युपदध्यात्॥ तासामेवपा
देष्टकाभिर्विशायाः॥ सं- दृष्टाभिश्चतुर्दशभिः उपदध्यात्॥ मध्येचतिस्रः॥ शिष्टद्वादशचतुर्भागीयाः॥
सर्वमग्निंपंचमभागीयाभिः प्रच्छादयेत्सादेष्टकाभिः संख्यापूरयेत्॥ इहपादेष्टकाशब्देनपुरुषंपरधिः
वां॥ चतुर्भागकरिता अणूकामध्ये पंचमभागीयाश्चकृत्वा उपधेयाइत्युच्यते॥ पुच्छेद्वादशचतुर्भागीयाः॥ ॥२४॥

आत्मनिप्रथमारीतिः पंचमभागीयानांप्रथमरीतिः॥ द्वितीयारीतिश्चतुर्भागीयानांषष्ठीमादेशानांनव
मीचतुर्भागीयानांशिष्टाः पंचमभागीयाः॥ एवद्विशतः प्रस्तारः कृतः॥ अत्रकेचनयाज्ञिकाअनुयासि
तः गुरवआचार्याभिप्रायमजानंतः ऊनाभ्यधिकप्रस्तारंकुर्वंति॥ अस्यनुसूत्रकारस्यप्रस्तारंपरयोदिति
वदतस्तदनभिमतएव॥ यद्येवमधिनस्याभिमतमभविष्यत् सर्वत्रप्रतिप्रस्तारंपरयोदितिनावक्ष्यत्॥
उक्तं चतस्माद्विशतः प्रस्तारः कर्तव्यइति॥ तत्रश्लोकाः॥ अष्टौश्रोण्यंसयोश्चापिपादाः सूत्रकृतेरिताः॥
तासांमध्येचतुर्थ्यः स्युश्चतुर्दशचतुर्दश॥ संध्यंतरालेपंचम्यः पादैश्चदशभिः सह॥ तासांमध्येदशप्रोक्ताः
प्राच्याः स्युः शुल्वकर्मणि॥ अष्टौपुच्छस्यपूर्वार्धेचतुर्थ्यः शिष्टएवतु॥ द्वितीयानवमीचैवचतुर्थीनाम
थात्मनि॥ उदीच्यएवरीतिस्स्युर्मध्याः पंचमपादकैः॥ ऊनाभिश्चतुरश्राभिरणूकार्धस्थ्यरत्निभिः॥ अस्या
एवसपादाभिः प्रस्तारोद्विशतीकृतइति॥ व्यासासंचितुयाधावतः प्रस्ताराः [illegible] कीर्तितं॥ गतमेतत्॥
ऊत्वर्धत्वेनोपादीयमानानामेकविधादीनां[illegible]पादितंतदानेषामुपधानविधिः बध्यं
मवतीति॥ उच्यते॥ एकविधप्रभृतीनांद्वादशानत्रयोदशोनेनेष्टकाः धारयेत्॥ करणीनांद्वादशोनत्र



Indira Gandhi National Centre for the Arts

॥२५॥ योदशोनकृतैः समचतुरश्रैरिष्टकाः कारयेत्॥ सर्वतो द्वादशो नैवं करणं॥ सर्वतस्त्रयोदशो न द्वितीयं॥ पादे
ष्टकाश्च॥ द्वादश पादास्त्रयोदश पादाश्चार्द्धेष्टकाश्चेति शुल्वांतरं॥ अस्माकमपि प्रउगेऽर्धेष्टकाः कार्याः॥
एकविधादिष्वपि यदि प्रथमप्रस्तारे द्वादशभिः द्वितीयस्त्रयोदशभिरित्यस्मिन्प्रस्तारेऽर्धेष्टकाः कार्याः॥
इतरथा संख्यानपूर्यतएव॥ तत्रश्लोकाः॥ द्विविधेरत्निकारज्जुः सप्तसार्धशतेन च॥ अंगुलीनां मिता
सास्याद्दूनाग्नेर्दशभिस्तिलैः॥ त्रिविधे मानिकारज्जुरष्टोत्तरं शतं—— पङ्क्तिरेवतिस्त्रैरूनागणकैः परिकल्पि
ता॥ विधस्यापि चतुर्थस्य मानिकारज्जुरुच्यते॥ मिताशतद्वयेनाधचत्वारिंशाधिकेन च॥ विधानोपं
चमस्यो यमष्टषष्टिशतद्वया॥ एकादशतिलैर्युक्ता मानि— का मणिका विदुः॥ चतुर्भिश्च नवसा च शता
न्यां च मिता भवेत्॥ त्रिभिरेवातिलैरूनाषद्विधस्य विमानिका॥ उपधाने भितः पाशास्तिस्रो रीयो— च
त्रयोदशस्तत एका त्रयोदशी॥ ततस्तिस्रो भितः पादाद्वादश्या द्वितीयायां रीयामेका द्वादशी त्रयोदशी
चतुर्थी चतस्रो न्योषमी प्रस्तारः॥ अपरस्मिन्प्रस्तारे द्वौ तिर्य्ये त्रयोदश्यो रेका त्रयोदशी पादा ततएका भितः
पादा त्रयोदशी ततश्चतस्रो द्वादश्यः॥ अथमध्यमाः षडिष्टकाश्चतुर्भेदाः प्रस्तारो द्विशतः कृतः॥ व्यसा॥
॥२५॥

चिनुयाद्यावतः प्रस्तारं श्चिकीर्षेत्॥ गतमेतत्॥ एकविधप्रभृतीनां प्रथमाहारेण द्वितीयेन तृतीयेने
ति योयुज्येत सर्वेषां यथाश्रुतिसंख्यानयोर्ध्वप्रमाणं॥ एकविधप्रभृतीनां षड्विधपर्यंतानां सर्वेषां प्रथ
माहारे द्वितीयाहारे च यथासंख्या श्रूयते किमुक्तं भवति॥ सुल्वकर्ताऽऽह॥ सिद्धिर्भव— प्रथमाहारः सहस्रं
संख्या ज्ञानुदृश्यताच॥ अथ द्वितीयः उक्ता एते धर्माः ससार्धस्वरूपयुक्ताएवेति तत्र स्वचनं सपार्धप्रकृ
संख्या ज्ञानुदृश्यताच॥ अथ द्वितीयः उक्ता एते धर्माः सप्तार्धस्वरूपयुक्ता एवेति तत्र त्वचनं सपार्धप्रकृ
तिज्ञापनार्थं॥ काम्या गुणविकारा गुणशास्त्रत्वात्॥ काम्याः प्रउगादयः गुणेन विकृताः॥ किमुक्तं भव
तिगुणफलसिद्धिर्नाग्नेः गुणशास्त्रत्वात्॥ शास्तीति शास्त्रं गुणोत्र शिष्यतो नाग्निः॥ तद्गुणशास्त्रत्वात्
गोदोहनादिवद्गुणफलान्येतानि॥ प्रउगचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते॥ प्रउग शकटपूर्वभा
गः तदाकारं चिन्वीत भ्रातृव्यवान्॥ यस्य वहवो भ्रातृव्याः सएव चिन्वीत॥ यावानग्निः सारत्नि प्रादेशो
द्विस्तावंती भूमिं चतुरश्रां कृत्वा॥ एतच्च वचनं ससार्धस्य प्रकृतीत्वख्यापनार्थं॥ पंचदशभिरंगुलिभिर्नवभि
श्चतिलैरूना चतुः पुरुषा रज्जुः तावंती भूमिं करोति॥ तया चतुरश्रं विहृत्य॥ पूर्वस्याः करण्या अर्धाच्छ्रोणी
प्रत्यालिखेत्सा नित्या प्रउगं॥ रज्जोश्चोतनमार्गेणश्रोण्यौ परिलिखेत्॥ करणानि चयनमिलेकं विधेतं॥



Indira Gandhi National Centre for the Arts

॥२६॥ करणानि च कारयेत्॥ द्वादशेन त्रयोदशेन पादेन च प्रउगाकारा एवात्र प्रउगा इष्टकाः कारयेत्॥ —
— अर्थोग पुरुषोरत्निना च पंचदशभिरंगुलिभिस्तिलै — कोनशतारज्जुपामात्रीभवति॥ साऽप्र
यो प्रमाण्ये तस्या द्वादशेन त्रयोदशेन च करणानि चकारयेत्॥ द्वादशाः प्रथमे प्रस्तारे प्रउगमुख्याः श्र
तुःषष्टिः पादेष्टकाश्चतस्रश्चतस्रः श्रोण्योरेवं चतुर्विंशोत्तरं शतं द्वादशपः॥ अपरस्मिन्प्रस्तारे त्रयोदशपः
श्रोण्योः पादाश्चत्वारिंशत् द्वावर्ज्यौ॥ पंचाशदधिकं त्रयोदशपः प्रस्तारो द्विशत एवं व्यत्यासं चिनुयात्॥
तत्र श्लोकाः॥ ऊनविंशसरत्नीभिरंगुलीभिः सहाष्टभिः॥ तिलानां पंचविंशत्या विमिता पार्श्वमानिका॥
एकविंशसरत्नीभिरंगुलीनां त्रिपंचकैः॥ तिलानामेकविंशत्या मिते॥ त्वष्टाविमानिके॥ कुर्वीत प्रउगम
ग्निमेताभिस्तिस्रः समीकृताः॥ आसामेव यथासंख्यं करणानि प्रकल्पयेत्॥ उभयतः प्रउगं चिन्वीत यः
कामयेतोत्पन्नानुत्पत्स्यमाना प्रजाता अल्यान्नुदेय प्रतिजनिष्यमाणानिति विज्ञायते॥ उभयतः शत्रू
न्प्रमुखमिव चिन्वीत यः कामयेतोत्पन्नानुत्पत्स्यमानांश्च शत्रून्नुदेयमिति॥ यथा द्विमुखे शकटे तावद
द्दीर्घे चतुरश्रं विहृत्य पूर्वापरयोः करण्योरर्धात्तावति दक्षिणोत्तरयोर्निपातयेत्सा नित्योभयतः प्रउगं॥
॥२६॥

तावदेव सप्तार्धं स्याद्द्विगुणं॥ इह तु दीर्घ चतुरश्रं द्विगुणायामविस्तारः॥ पुरुषद्वयेनाष्टभिररत्निभिः॥
षोडशभिरंगुलीभिरेकविंशत्या तिलैर्भिन्ना तिर्यङ्मानी द्विगुणा पार्श्वमानी॥ एवं दीर्घ चतुरश्रं विहृत्य
तिर्यङ्मानीमध्ये पार्श्वमानीमध्ये च शंकुं निहत्य शंकुषु रज्ज्वा वेष्टयित्वा बाह्यतस्त्यजेत्॥ सप्तषष्टिशतं
त्रयमंगुलीनां चतुर्दशभिस्तिलैः सार्धमीषाप्रमाणमासां द्वादशेन करणानि कारयेत्॥ प्रउगचितोक्त
उभयतः प्रउगा इष्टकाः कारयेत्॥ उभयतः प्रउगाकारा इष्टकाः पादाश्च उभयतः प्रउगमत्रश्चयनाधिकृताः
प्रउगेन॥ तत्र श्लोकाः॥ त्रिसप्तकैस्तिलैर्युक्तं साष्टाविंशशतत्रयं॥ प्रउगस्योत्तरस्योक्तं तिर्यङ्मानीविद्
र्बुधाः॥ तिर्यग्द्विगुणिता यामे चतुरश्रे हविर्भुजः॥ शंकून्निहन्यात्मध्येषु करणेषु चतुर्ष्वपि॥ रज्जुं शंकुषु सं
वेष्ट्यान्यश्रोण्योरसात्परित्यजेत्॥ शिष्टं सप्तार्धमेव स्यात् शकटे विमुखे यथा॥ चतुर्दशतिलैर्युक्तं सप्तषष्टिश
तत्रयं॥ प्रउगस्योत्तरस्येतदीषामात्रं प्रकल्पितं॥ ईषा द्वादशभागेन तथा सव्यान्तरेण च॥ उभयतः प्रउगी
भूताः सपादः॥ कारयेदिह॥ रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते॥ अरुन्याचरेष चक्रद्वयमुक्तं॥
अनेनार्थे लोकमेवोक्तं॥ तस्मात् देवोच्यते॥ यावानग्निः सारत्निप्रादेशस्तावतीं भूमिं परिमंडलां कृत्वा

॥२८॥ तस्मिं२श्चतुरस्रमवदध्याद्यावत्संभवेत्॥ उभयतः प्रउगस्य यातिर्यगानीतया चतुरस्रं कृत्वा तस्य कर
ण्या द्वादशेनेष्टकाः कारयेत्॥ ताश्चतुरस्रे चत्वारिंशदधिकमुपधाय॥ तासां२ षट् प्रधावुपधावुपधा
यशेषमष्टधा विभजेत्॥ प्रधिकाश्च तास्तेषु प्रधिकेषु षडिष्टका द्वादशेन कारिताऽपधाय शेषं प्रधि
कं मष्टधा विभजेत्॥ अष्टभिरुपदध्यात्॥ तासां करणं वक्ष्यामः त्रयस्त्रिंशदंगुलमष्टभिस्तिलैरूनमे
कं॥ अष्टाविंशत्यंगुलमेकं॥ अष्टाविंशत्यंगुलं तिलाभ्यां सहैकं॥ एतैश्चतुर्भिः फलकैरेकं करणं॥ अ
स्य चतुर्थं फलकं तक्षेत् एषा चतुरस्राकारं भवति॥ एषा शरमष्टादशं तिलमात्रं भवति॥ तथा एकत्रिंशदं
गुलं द्वादशभिस्तिलैरूनमेकं एकविंशत्यंगुलमेकादशभिस्तिलैरूनमेकं॥ अष्टात्रिंशदंगुलं त्रिभिस्ति
लैः सहैकं॥ नवत्रिंशदंगुलं द्वादशभिस्तिलैः सहैकं॥ नवत्रिंशदंगुलं तिलेन सहैकं॥ एतैश्चतुर्भिर्द्वि
तीयं करणं॥ अस्य चतुर्थं पूर्ववत्तक्षेत्॥ शरप्रमाणं तिलाभ्यां सहैकं नवतिं नवानक्षेत्॥ चत्वारिंशदंगु
लं दशभिस्तिलैरूनमेकं त्रयस्त्रिंशदंगुलं दशभिस्तिलैरूनमेकं द्वात्रिंशदंगुलं तिलेन सहैकं तिलाभ्यां स
हैकं भवति नयात क्षेत्॥ त्रिचत्वारिंशदंगुलं दशभिस्तिलैरूनमेकं त्रयस्त्रिंशदंगुलं दशभिस्तिलैरून ॥२८॥

मेकं द्वात्रिंशदंगुलं तिलेन सहैकं द्वात्रिंशदंगुलं द्वादशभिस्तिलैः सहैकं॥ अष्टाविंशत्यंगुलमेकादश
भिस्तिलैः सहैकं पंचपंचाशदंगुलं चतुर्भिस्तिलैरूनमेकं॥ एतैश्चतुर्भिश्चतुर्थं करणं॥ तस्य चतुर्थं तक्षे
त् पूर्ववत्॥ शरप्रमाणं तुल्यं घ्यंगुलं त्रिभिस्तिलैरूनं॥ तत्र श्लोकौ भवतः॥ रज्जुः कृताऽन्यतः पाशासाशी
शीतिघाते तया॥ तिलाभ्यां रथचक्रस्य करोत्येषानुमंडलं॥ चतुरस्रकरी रज्जुः शतं पङ्क्तिः शतद्वया॥ तिलैस्त्रयो
दशो युक्ता रथचक्रे हविर्भुजि॥ उपधाने चतुरस्रस्यावांतरदेशान्प्रतिस्रक्तीः संपादयेत्। आनीतरश्मिन्नस्ता
रे व्यासासंचिनुपाधावतः प्रस्तारा२ं श्चिकीर्षेत॥ गतमेतत्॥ एष एव मकारो मंडलश्मशाने द्रोणे च॥ द्रोण
चितं चिन्वीतान्नकाम इति विज्ञायते॥ अन्नकामस्य द्रोणचितिरिति श्रुतिः॥ द्रयानि तु रथलु द्रोणानि चतुर
स्राणि परिमंडलानि च त्रयाधाकामी शब्दार्थस्य विशयित्वात्॥ द्रोणशब्दो जलाधारस्य वर्तुलाकारस्य वाच
कः॥ दारुमयस्य सत्सरुकस्य चतुरस्रस्य च॥ तत्र कतरो गृह्यत इति॥ उच्यते॥ या पाकामी चतुरस्रं वायस्य
गुणशास्त्रं समचतुरस्रोयस्याग्नेः पश्चात्सरु भवत्यनुरूपत्वायेति विज्ञायते॥ वाशब्दः पक्षव्यावर्त्तोन विक
ल्पार्थः॥ नैष मंडलाकारश्चेतव्यः चतुरस्र एव चेतव्यः॥ यस्य गुणशास्त्रं॥ द्रोणे वा अन्नं भ्रियत इति च



Indira Gandhi National
Centre for the Arts

॥२९॥ तुरश्रेयुज्यते॥ न वर्तुलाकार द्रोणे॥ अतो गुणसंबंधाच्चतुरश्रा एव निश्चीयते॥ तस्माच्चतुरश्र एव चेतव्यः॥
पश्चात्पुच्छस्य स्थाने त्सरुर्भवति॥ त्सरोः प्रमाणं तु यैव द्विगुणीकृता या॥ द्रोणः तस्यात्ततः पुच्छे नैव मानमार्गो
व्याख्यातः॥ तस्य करण्या द्वादशो नेष्टकाः कारयेत्॥ तस्येति द्रोणः परामृश्यते न त्सरुः॥ त्रिकोण समदलेन
चतुर्भागेनेत्यर्थः॥ अध्यर्धाः पादेष्टकाश्च॥ अत्रैव प्रतिपन्नायग्निकाः॥ केचिदपरा पादमिच्छंति॥ केचिदी
र्घपादमर्धेष्टकाः कर्त्तव्याः॥ तानि भिनासंख्यापूरणस्य शक्यत्वात् वक्तव्यमुक्तं सूत्रांतरे र्धेष्टकाश्चेति॥ इहापि
चत्वारा दर्धेष्टकाश्चेति करण — षष्ट्विंशदंगुलं तिलोनमेकं करणं॥ एकतोध्यर्धं द्वितीयं॥ प्रथमकरणमुभ
यतो स्पणयाच्चतुर्थादीर्घं तेन पादानां तृतीयकरणं॥ तथैव करणेन दीर्घेण यार्धेष्टकानां करणं चतुर्थं॥ पुरस्ता
न्ने ध्यर्धाः पुरस्तात्प्रतीचीरुपमनुपदधाति सर्वे ग्रेश्रोण्योश्च प्राचीः सर्वमग्निं चतुरश्राभिः प्रच्छादये सादेष्टका
भिः संख्यां पूरयेत्॥ उपधानेयथास्त्रम मध्यार्धा उपधाय पूर्वार्धे समदशोष्टका अपराभिर्यानूनाश्चैत्रभि
पद दीर्घाश्चेसादः॥ उत्तरस्यां रीयां न वेष्टकाभिर्घात॥ यथा प्राचीः पादान्तान्य पादक्षिणस्याम ष्टौतथैव प्राचीः॥
एका — धास त्रतथैव पर्णः प्रस्तारः॥ अपरस्मिन्प्रस्तारे ध्यर्धा दक्षिणतः पुदीचीरात्मनुपदधात्स्युत्तरतश्च दक्षि ॥१३॥ ॥२९॥
णात्सरुपार्श्वयोर्दक्षिणा उदीचीश्च सर्वमग्निं चतुरश्राभिः प्रच्छादयेत्सादेष्टकाभिः संख्यापूरये द्यासं अर्धेत्

अपरस्मिन्प्रस्तारे पश्चादात्मनि अष्टादशेष्टकाः करणे भिंद्यात्॥ द्वे द्वे इष्टके द्विधा करणेनैव यदीर्घाः पादाः पू
र्वस्यां रीयां न वेष्टकाभिर्घात॥ यथावा उदीच्यः श्रोण्यो द्वे द्वे त्सरोः पश्चादेकाग्रतः नामध्यर्धाः सात्सरौ तथः अ
ध्यर्धाः पादाः सर्वा उदीच्यः॥ एवं प्रस्तारो द्विप्रातः तत्र श्लोका भवंति॥ मितात्त्रिभिस्तिलैरूने चतुर्भिश्च शते
नच॥ द्रोणस्यैषां त्सरोर्मात्रा तस्य त्रिगुणिते त्सरा॥ पादा अर्धाश्च भेदास्यु करणानि विभावसो॥ द्रोणरथे
चश्मशाने च चतुरश्रे हविर्भुजि॥ प्रस्तारे प्रथमे पादा न त्रस्युस्तत्र नोत्तरे॥ द्वावर्धौ प्रथमस्तारे चतुर्थस्तरस्त
रे॥ निधाय चोत्तरस्तारे अध्यर्धा अपि पूर्वके॥ अध्यर्धा यत्र तत्र स्युः पादादीर्घा यदि क्षणः॥ प्राच्यः स्युः प्रथ
मे स्तारे उदीच्यस्तूत्तरस्तरे॥ अभितः पादमध्यर्धा यैरीतयः समश्चोत्तरा इति॥ समूह्यं चिन्वीत पशुकाम इति
विज्ञायते॥ समूह्य इत्युपधानप्रकारविशेषो नाविशेषः प्रकृतावयं विधिः॥ नाकृतिविकारेषु॥ समूहन्निवे
ष्टकाउपदधाति॥ अग्निक्षेत्रस्य परित इष्टकास्थापयी ता यथा समूहनं क्रियते न तथोपदधाति सर्वेन उपादायो
पदधातीति यावत् स एवोपधानविधिः॥ दिक्षु चात्वाला भवंति तेभ्यः पुरीषमभ्यूहतीति विज्ञायते॥ प्रति
दिशं चात्वाला भवंति॥ बर्हिर्वेदि॥ तेभ्यः श्चात्वालेभ्यः पुरीषं पांसुमभ्यूहतीति श्रुतिः॥ परिचाय्यं चिन्वीत

॥२९॥ ग्रामकाम इति विज्ञायते ॥ अयमप्युपधानविधिः ॥ मध्यमां स्वयमातृण्णां प्रदक्षिणमभिप्लवकाः गणैः परि
चिनोति स परिचाय्यः ॥ तृतीयस्यां चितौ स्वयमातृण्णामुपधाय इष्टकागणैः प्रदक्षिणं तां स्वयमातृण्णां
परित उपदधाति स परिचाय्यः ॥ उपचाय्यं चिन्वीत ग्रामकाम इति विज्ञायते परिचाय्ये नोक्तः ॥ पूर्ववत् ॥ परिचाय्ये
न व्याख्यातं श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति विज्ञायते ॥ पितृलोके ऋध्यासमि
ति यः कामयेत स एवं चिनुयात् ॥ इयानि तु खलु श्मशानानि चतुरश्राणि परिमंडलानि च तत्र याणाकामी
शब्दार्थस्य विरोधित्वात् ॥ चतुरश्राकाराणि संति श्मशानानि परिमंडलाकाराणि च तत्रेष्टातः प्रवृत्तिः शा
दस्योभयत्र प्रवृत्तेः ॥ यदि वर्तुलाकारं स्यात् तत्रैव ॥ चतुरश्रं वागतमेतत् ॥ यस्य गुणं शास्त्रं ॥ पितृलोकसं
बंधं तच्चतुरश्रे श्मशानेन वर्तुले वल्ताहि तत्रानिक्षिप्यंते पेष्ठपैतृमेधिकी क्रियाते पां पितृणां संबंधः ॥ र
थाच ॥ तस्माच्चतुरश्र एव चेतव्यः ॥ सह वर्जं द्रोणचितोक्तः ॥ यदा चतुरश्रं तदा सरु वर्जं द्रोणचितोक्तः ॥
तत्सर्वं द्रोणचितेव व्याख्यातं ॥ छंदश्चितं चिन्वीत पशुकाम इति विज्ञायते ॥ छंदोभिरेव यत्रेष्टकाश्चीयंते तच्छ
दश्चितं ॥ पशुकामश्चिनुयादित्यस्याः श्रुतेरर्थः श्रुतिद्वयेन व्याचष्टे ॥ सर्वं छंदोभिश्चिनुयादित्येकं प्राकृतैरिय
परं ॥ सर्वैश्छंदोभिर्दशतयाभिश्चेतव्य इत्येकाश्रुतिः ॥ प्राकृतैः प्रकृतोपानि छंदांसि अग्निर्मूर्धेत्यादीनि तैरेवे ॥२९॥

सपराश्रुतिः ॥१४॥ चतुर्थः पटलः ॥४॥ ॥ श्येनचितं चिन्वीत सुवर्गकाम इति विज्ञायते ॥ श्येन इव चेतव्यः
श्येनचित् तदाकारं चिन्वीत आकृत्या फलमाकारसंपादनं ॥ स्वयमेव वक्ष्यति ॥ वक्रपक्षो व्यस्तपुच्छो भवति ॥
अन्नतुः पक्षः ॥ व्यस्तः पुच्छः असंकोचितपुच्छः ॥ कथं वक्रता ॥ पश्चात्प्राङ् उद्धृति पुरस्तात्प्रत्युदूहति ॥ प
श्चात्प्राङ् उन्नयंति ॥ पुरस्तात्प्रत्यगुन्नयति ॥ एवं वक्रो यस्य स वक्रपक्षः ॥ एवमिव हि वयसां मध्ये पक्षि
निर्णामो भवतीति विज्ञायते ॥ हि शब्दः प्रसिद्धौ ॥ एवमिव एवमेव वयसां मुसनतां मध्ये पक्षि निर्णामो नम
नं भवतीति श्रुतिः ॥ यावानग्निः सारत्निप्रादेशः सप्तविधः संपद्यते प्रादेशं चतुर्थमात्मनश्चतुर्भागीया
श्चाष्टौ तासां तिस्रः शिरसि इतरत्पक्षयोर्विभजेत् ॥ अरत्निप्रादेशेन वर्धितोऽग्निः प्राकृते यावान् संपद्यते तथा
प्रादेशेऽहीना अष्टौ गृह्णीयादिति शेषः ॥ सारत्निप्रादेशाग्नौ यत्प्रादेशं पुच्छे आत्मनश्चतुर्थं पुरस्तात्त्रं च
तुर्भागीयाश्चाष्टौ शिष्टेति पुरुषे अष्टौ चतुर्भागीयाः पुरस्तात्त्रं च गृहीत्वा तासां चतुर्भागीयानां तिस्रश्चतुर्भागी
याः शिरसि निधातव्याः ॥ इतरत्सर्वं पक्षयोर्विभज्य क्षिपेत् ॥ षडंगुलं प्रादेशाः षष्ठांगुलं पुरुषे चतुर्भागीया
सु पंचसु पादोन नवदशांगुलं एतदेकैकस्मिन् पक्षयोः क्षिपेत् ॥ पंचारत्निः पुरुषश्चतुररत्निर्व्यायामश्च



Indira Gandhi National Centre for the Arts

॥३०॥ तुर्विंशत्यंगुलयोरत्निः॥ एतत्पुरुषस्य प्रमाणं॥ चतुररत्निः॥ एतदरत्निप्रमाणं॥ तदर्धः प्रादेश इति कुक्षिः॥
एवं चाल्पनाइति शब्दः प्रकारे॥ अनेन मार्गेण कल्पयेदित्यर्थः॥ त्रिंशदंगुलं चतुर्भागीयः॥ अर्धदशमा
अरत्नयोंगुलिश्चतुर्भागो नामपक्षायामे॥ प्रादेश दशमा अरत्नयोंगुलिश्चतुर्भागो नापक्षायामः॥
पक्षयोरायामः प्राकृताः षडरत्नयः॥ अर्धे पुरुषे प्रादेशसहितोरत्निद्वयम ष्टादशांगुलश्चतुर्भागेन च
प्रादेशो षडंगुलिः ता अष्टादशभिः सहारत्निः सर्वे संभूयार्धदशमाः सारत्नयोंगुलश्चतुर्भागो ना एष
पक्षयोरायामः द्विपुरुषां रज्जुमुभयोतः पाशां करोति मध्ये लक्षणं॥ द्विपुरुषं रज्जुमुभयतः पाशौ कृ
त्वा मध्ये लक्षणं कुर्यादिति शेषः॥ प्रक्षस्यापरयोः कोण्योरंतौ नियम्य लक्षणेन प्राची नमायच्छेदेवं पुरस्ता
त्सनिर्णीमः॥ दक्षिणपक्षस्यापरयोः कोण्योरपरयोरंतौ नियम्य पाशौ प्रतिमुच्य लक्षणेन प्रयगपसार्य शं
कुं निहन्यात्॥ एवं पुरस्तात्पूर्वयोः कोण्योरंतौ नियम्येयं यमादि सन्निर्णीमो न मनं पक्षयोः॥ एतेनोत्तरः
पक्षो व्याख्यातः॥ अनेनैव मार्गेणोत्तरस्यापि पक्षस्य नमनं व्याख्यातं॥ एदाप क्षयोर्वक्रता॥ आत्मा द्वि
पुरुषायामोऽर्धपुरुषव्यासः॥ द्विपुरुषायाम आत्मार्धपुरुषव्यासः॥ एवं दीर्घचतुरश्रं विहृत्य॥ पुच्छेर्ध
पुरुषव्यासं पुरुषं प्रतीचीनमायच्छेत्॥ पुच्छेर्धपुरुषानि यथानीपुरुषप्रमाणपार्श्वमानी भवति यथा ॥३०॥

तथायच्छेत्॥ कुर्यादित्यर्थः॥ तस्य दक्षिणतोन्यमुत्तरतश्चान्यमवकरणपाय्यवलिखेद्यथा पुरुषोप्ययं स्यात्॥
तस्य चतुरश्रस्य दक्षिणपार्श्वे न्यताद्दक्षिणं चतुरश्रं एवमुत्तरतश्चान्यं त्रीणि चतुरश्राणि अर्धपुरुषव्यासा
नि॥ तौ चतुरश्रौ यौ पार्श्वस्थौ तावकरणयाकर्णनालिखेत्॥ यथाप्ययं आत्मपुच्छसंधौ अर्धपुरुषमात्रं कृ
तं पूर्वस्य भवति॥ स्रुच्यभिवदक्षिणं स्त्रावमिवोत्तरं॥ एवं कृते व्यासये अर्धपुरुषमात्रं भवति॥ शिरस्यर्ध
पुरुषेण चतुरश्रं कृत्वा पूर्वस्याः करण्या अर्धात्तावति दक्षिणोत्तरयोर्निपातयेत्॥ शिरस्थाने र्धपुरुषेण
चतुरश्रं कृत्वा तस्याः करण्यादर्धादारभ्य तावत्येवार्धेनिपातयेत्॥ आलिखेत्॥ तिस्रः परिशिष्यंत इत्युप
दिशतेनेव ह्यात्॥ तत्रा॰ पितिस्रः शिर इत्युक्तं॥ १५॥ अप्ययान्प्रतिश्रोण्य २ सान पच्छिंद्यात्॥ अप्ययशब्दे
न पक्षपुच्छशिरसां संधिरुक्तः॥ तान्प्रसपच्छिंद्यात्॥ श्रोण्यंसान् सृजेत्॥ शिरसोप्ययात्प्रभृत्य पक्षाप्ययं
प्रतिपायं श्रोण्योरंसे च एवं द्वे द्वे चतुर्भागीये निरस्ते भवतः॥ वक्ष्यति च॥ चत्वारिंशाद्यभिशिष्यंत इति॥ एव
मिवाहिश्येनः॥ प्रसिद्धं वक्ष्यति॥ याचदाम्नाने न सारूप्यमिति॥ करणं पुरुषस्य पंचमायाम षष्ठव्या
संकारयेत्सुधायो गननंतनं प्रथमं॥ पुरुषस्य पंचमायामं पुरुषषष्ठव्यासं अरत्निपार्श्वमानी षड्भागीया

८८

॥३५॥ तिर्यग्धानीय यथा युज्यतेन यानतः॥ ननशब्देन प्रउगं भन मुच्यते॥ तथा प्रउगं भयेत्॥ एकामस्त्र दीर्घं कुर्या
त्॥ नेद्वे प्राचीस ॒ हितेन द्वितीयं॥ मात्रात्रमस्त्रणयाभिध्यात्॥ हि यथा युज्यते न मनंतयायोग॥ यथा पद्र
मेने अ यौ युज्यतेन यानतं वस्त्रं तनीयं करणं॥ चतुर्भागीया प्य धी भमावालिरव्य चतुर्भागीयांन सृजेत्॥
मध्या भता यैष्ट काकरणे त्रि यतेन चतुर्थं करणं पोडशी चतुर्भिरितिव क्ष्यति न देन करणं॥ चतुर्भागीयार्ध
पंचमं॥ एकत्रिंशदंगुलं अन्यतः पंचदशांगुलं नदेनसंचमं॥ तस्या स्त्रणया भेदः षष्ठं॥ तस्य पंचमस्या
स्त्रणया विभज्य इति भेदः षष्ठं॥ पुरुषस्य पंचमं भागं दशभागव्यासं प्रतीचीनमायछे तस्य दक्षिणोत्यमु
त्तरतश्चनाव स्त्रणया दक्षिणापरयोः कोणयोरालिखेत्तत्सप्तमं॥ अरत्नि मात्रायामं प्रादेशव्यासं प्रतीचीनं
प्रसगायतमायछेत् सौ दक्षिण पार्श्वेन याविधमुत्तरतश्चान्यं न याविधं नाव स्त्रणया कर्णेन दक्षिणोत्तर
योः कोणयोरारभ्य स्त्रुचावदालिखेत्॥ तत्सप्तमं॥ एवमन्य दुत्तरं तु रस्याः कोणयोरालिखेत्तदष्टमं॥ एषमे
वक्ष्योत्तरं चतुरश्रं उत्तरस्याः कोणयोरारभ्य दक्षिणां कोटिं प्रत्यालिखेत् स्त्रौववत्तदष्टमं॥ चतुर्भागीया
स्त्रणयोभयतो भेदो नवमं॥ अस्या याउभयतः — कर्णे नदे — खंडं तं तस्याश्चतुर्भागीयोयस्त्रया विधं नवमं
॥३५॥

करणं पाद मात्रं॥ पादेष्टकां त्रिभिरितिव क्ष्यति॥ उपधाने षष्टिः षष्टिः पक्षयोः प्रथमं॥ उदीकूपदध्या
त्॥ उपधान काल एक स्मिन्पक्षे षष्टिः प्रथमा उदीची: उदगायता उपदध्यात्॥ त्रिंशत्रिंशद्विपर्यस्यकारि
ताः॥ एवमुत्तरे पक्षे॥ पुछ पार्श्वयोरष्टावष्टो पध्याः॥ अष्टावेकस्मिन्पार्श्वे अपरस्मिंश्चाष्टौ कथमिसाह॥ ति
स्त्रो गोमतय एकांतन एकांततस्तिस्त्र नएकां॥ पुछाग्रेति स्त्रस्त — स्तासां पुरस्तादेकां॥ एवमुत्तरस्मिन् पार्श्वेवि
पर्य॰ स्य कारिताः॥ अंसयोश्चैवं शेषे च षष्टिं ॒ शत्तिरष्टौ षष्ठ्यश्चतस्त्रः पंचम्यः॥ आत्मशेषे शिष्टे देशे षड्विंश
तिश्चतुर्थ्यः अष्टौ षष्ठ्यश्चतस्त्रः पंचम्यस्तासामुपधानमार्गउच्यते॥ विंशत्या नांस — गैतिषा॥ मात्मनि चतुर्द
शचतुर्थ्यः तासां पार्श्वयोर्द्वे द्वे प्राच्यौ प्रतीच्यौ विपर्यस्य कारितो दक्षिणे पार्श्वे एवं पुरस्ताद्द्वे द्वे विपर्यस्या॥ उक्ता॰रिते॥
उक्ता॰रिते॥ उत्तर पार्श्वे चतुर्दशानामेव पार्श्वयोर्मध्ये द्वे द्वे॥ तया — एकाष्टकाः षड्वि॰ शतिश्चतुर्थ्यः॥ उपहिताश्च
तस्त्रश्चतुर्भागीयाः कोणे पुरस्तात्स्त्रासु चतस्त्रः पंचम्यः॥ तिर्यक् पष्ठ्यश्चाष्टौ तिर्यगेव॥ शिरसि चतुर्थ्यौ विधू
तस्त्रश्चतुर्भागीयाः कोणे पुरस्तात्प्राच्यौ॥ तयोर्विशययोः पुरस्तात्प्राच्यौ चतुर्थ्यौ॥ विपर्यस्यकारिताः दक्षिणतः॥ ए
य॥ तिर्यक्॥ तयोश्च पुरस्तात्प्राच्यौ॥ तयोर्विशययोः पुरस्तात्प्राच्यौ चतुर्थ्यौ॥ विपर्यस्य कारिताः दक्षिणतः॥ ए
षड्विधानः प्रस्तारः॥ किमर्थमिदं॥ यावता द्विशत एव परिभाष्यं॥ प्रस्तारो द्विशतपरिभाष्यते॥ संख्यां पूरयेद्

॥२२॥ सुनो द्विशतन एवं पूर्यते इतरथा संख्यापूरयितव्येति न ज्ञायते कस्येति सहस्त्रसंख्येति चेन्नन प्रतिप्रस्तारं पूर
येदितिवचनमापद्येत तस्मात् परिभाषेयमिति ॥ अपरस्मिन्प्रस्तारे पंच पंच निर्णामयो द्वितीयाः ॥ द्वितीया
दक्षिणा ॥ निर्गमो वक्रप्रदेशः ॥ तस्मिन्प्रदेशे पंच पंच द्वितीयाः ॥ अप्यययाश्च तृतीया आत्मानमष्ट
भागोपेताः ॥ पक्षमप्यययोस्तृतीया आत्मनः प्रविभागावभागव्याप्त चतुर्भागीये पका मात्रमात्मनिरिक्
ताः पंचपंचविपर्यस्यकारिताः उत्तरं पक्षाप्यये ॥ शेषे पंच चत्वारिंशत् यं च चत्वारिंशत् प्रथमाः प्राची ॥ द
क्षिणे पार्श्वे पंचविंशतिः ॥ दक्षिणे पक्षे उत्तरे पार्श्वे विंशतिः ॥ उत्तरे पक्षे विपर्यस्यकारिताः दक्षिणे पार्श्वे विंश
तिः ॥ पुच्छपार्श्वयोः पंच पंच सप्तम्यः ॥ पुच्छस्य पार्श्वयोः पंच सप्तम्यः ॥ उत्तरे पार्श्वे विपर्यस्यकारिताः ॥ द्वितीय च
तुर्थ्योश्चान्यतरतः प्रतिरं हितामेकैकां ॥ द्वितीयायां रात्र्यां चतुर्थ्यां रोयामन्यस्मिन्पार्श्वे सप्तमीः एकां दक्षिण
पार्श्वे विपर्यस्यकारिताः ॥ अपर उत्तरे पार्श्वे ॥ शेषे त्रयोदशाष्टम्यः ॥ शेरते ॥ श्रोण्यं सेपुच्छे चतुर्थ्यां दक्षि
णा उदीचीश्च ॥ दक्षिणस्यां दक्षिणायतेविपर्यस्यकारिते उत्तरस्यां श्रोण्यामुदगायते दक्षिणे से दक्षिणायते उ
त्तरे से उदगायते विपर्यस्यकारिते ॥ शेषे चविंशतिस्त्रिंशाष्ट्या एकां पंचम्यां ॥ चकारेण चतुर्थ्यानुकृष्यते ॥
त्रिंशत षष्ठ्या ॥ एका च पंचमीना सामुपधान देश उच्यते ॥ आत्मनो दक्षिणे पार्श्वे दश चतुर्थ्यः ॥ पंच प्राची पंच प्रती ॥२३॥

ची ॥ एवमुत्तरे पार्श्वे — त्रिंशत् षष्ठ्यः प्राचीप्रस्तारे पंचमीनां तासां पंच दश प्रतीची ॥ शिरसि चतुर्थ्योन योश्च पु
रस्ताच्चतस्रो न यम्यः ॥ तिर्यक्पानवम्यः ॥ न यम्यश्चतस्रः पुरस्तात् ॥ एष द्विशतः प्रस्तारः ॥ गतमेतत् ॥ किम
र्थमिदं नियमार्थं ॥ किमत्र नियस्यमे ॥ एष द्विशतः प्रस्तार इति नियम्यते ॥ नोपरितनश्येनः ॥ श्येन एवानिय
माने नान्यः ॥ इति प्रस्तारपूरणवचनात् ॥ तत्रापि व्यासासं चिनुयाद् दिसेन दैवोक्तं ॥ न पूरणवचनं ॥ तस्माद
न्यो द्विशतः प्रस्ताराः ॥ अत्रैव परिभाषितत्वात् ॥ इष्टकाकरणे पंचचत्वारिंशदंगुलं दक्षिणे न हित्वा चतुर्थी
कारयेत् ॥ विपर्यस्ताः सव्येन ॥ व्यासासं र्षैत ॥ तत्रापि व्यासासं चिनुयात् ॥ गतमेतत् ॥ अत्र श्लोका भवंति ॥
एकोनविंशतिस्तिर्यक् त्र्यंगुलं सार्धं तद्द्वयं ॥ यथा भवेत्तथा कार्या यथा योगनतं तु तत् ॥ यथोदीच्येव षड्भागे
षष्ठभागेन वर्धनं ॥ करणं स्यात् तृतीयस्य यथायोगनतं भवेत् ॥ सविशेषश्चतुर्थस्य द्विचत्वारिंशदंगुलं ॥ चतु
र्दशतिलेयुक्तं करणं भविष्यति ॥ षष्ठस्य कर्णपक्षकस्य तत्त्र्यस्त्रिंशदंगुलं ॥ अष्टादशतिलैर्युक्तं इतरे स
त्र सादिते ॥ पार्श्वस्थाः सप्तमस्य पंचविंशत्या सह सप्तभिः ॥ षड्भिरेव तिलैरूना पक्षके स्यात् षष्ठमस्य च ॥ प्रथमेनत्व
तीयेनाविपर्यस्य पुनः पुनः ॥ तथा षष्ठमसप्तम्यां कारयेदिष्टकाः कृतौ ॥ पंचत्रिंशद्विपर्यस्य चतुर्थं नापि कार

Indira Gandhi National
Centre for the Arts

॥३३॥ येत्॥ एतावदेव कुशला इष्टका करणे विदुः॥ पुच्छे तिर्यङ्‌ निधातव्याश्चतुर्थ्यो दश चोदिताः॥ शययोश्चांत
रा तिर्यक् चतुर्थ्यास्याः श्चतुर्दश चतुर्थ्यः पार्श्वयोस्तासां द्वे इष्टे इति यं कृ तुम ध्यमः॥ कोणेषु तिर्यक् पंचमः
पश्चाच्चाष्टौ तथाविधा॥ आपुच्छस्याप्ययास्तद्वत् शिरसि त्रिंशदिष्यते॥ प्राच्यश्चैव प्रतीच्यः प्राचीश्चैव पं
चमी॥ चतुर्थ्यः पार्श्वयोस्तासां तथाशिष्टे च विंशतिः॥ अन्यास्सर्वं यथास्त्रं प्रस्तारो द्विशती हते॥ श्रोण्यो
श्चैव तथैवांसौ पदूसुले वयथाविध॥ चतुर्थ्योस्यापि दक्षिणतनचैताः प्रथमे प्रस्तारे स्तरे॥ पुंसां दक्षिण
निक्षेयंतयो श्चैवाच — — — ॥४७॥ ॥पंचमः पटलः॥ ५॥ श्येनचितं चिन्वीत सुवर्गकाम इति विज्ञायते॥॥
अस्याः कृतेः पुनरुपन्यासो मार्गांतरं प्रतिपादयितुं॥ अथवा अन्यैवैषा कृतिः॥ इयमेवाकारमाश्रिता॥
वक्रपक्षो व्यस्तपुच्छो भवति पश्चात्प्राङुदूहति पुरस्तात्प्रत्यङुदूहत्येवमिव हि वयसां मध्ये पक्षिनिर्णयो भवती
ति विज्ञायते॥ गतमेतत्॥ पुरुषस्य षोडशीभिर्विंशं शतं मारत्नि प्रादेशः सप्तविधः संपद्यते॥ पुरुषस्य षो
डशांशः षोडशीतासिर्विंशोत्तरं शतं संपद्यते॥ परिगणनायाः क्रियमाणायाः एवं तस्य षोडश्यः सप्त
पंचाशत्॥ सप्तस्वापत्निषोडशभिर्गुणिते द्वादशोत्तरं शतं॥ अर्धपुरुषे च द्वादशस्यष्टौ क्षिप एवं विंशोत्तरं
शतं संपन्नं॥ तासां चत्वारिंशत्॥ शिरसि॥ तासां षोडशीनां चत्वारिंशदात्मनि ड पधेयाः॥ तिस्रः शिरसि॥ तिस्रः ॥३३॥

शिरसि निधेया इति सर्वत्र शेषः॥ पंचदश पुच्छे॥ पुच्छे पंचदश॥ एकत्रिंशद्दक्षिणे पक्षे॥ दक्षिणे पक्षे एकत्रिंशत्॥
तथोत्तरे॥ एकत्रिंशदुत्तरे स्येत्॥ श्रोण्यामंसाभ्यां च द्वे द्वे षोडश्यौ प्रसेके निरस्येत्॥ पजेत्॥ अस्या पाथयानुप्रती
ति॥ यथा श्रोण्यंसेषु चत्वारि चतुरश्रोणि अर्धपुरुषप्रमाणानि कृत्वा अर्धानि निरस्येत्॥ चत्वारिंशासरि
शिष्यंते॥ शिष्टं चत्वारिंशत्॥ स आत्मा शिरस्यर्धपुरुषेण चतुरश्रं कृत्वा पूर्वस्याः करण्या अर्धांत्ताव दक्षि
णोत्तरयोर्निपातयेत्॥ गतमेतत्॥ तिस्रः परिशिष्यंते॥ शिष्टास्तत्र॥ तच्छिरः पुरुषस्तिर्यगद्धावायामतः
षोडशभागश्च दक्षिणः पक्षः॥ पुरुषमात्रा तिर्यङ्मानी द्विपुरुषा पार्श्वमानी पुरुषषोडशभागा अर्धांषांगुल
मात्रं दक्षिणे॥ पश्चायामः॥ तथोत्तरः॥ तद्द्वे द्वे वोत्तरः॥ तद्वदेवोत्तरः पक्षः॥ पक्षाग्रे पुरुषचतुर्थेन चत्वारि
चतुरश्राणि कृत्वा तान्यक्ष्णया व्यवलिख्यार्धानि निरस्येत्॥ पक्षयोरग्रभागं पुरुषचतुर्थप्रमाणेन चत्वारि
समचतुरश्राणि कृत्वा तान्यक्ष्णया वर्तोत्तालिख्यार्धानि निरस्येत् त्यजेत्॥ स्रुच्यावदक्षिणपक्षाग्राणि स्रौवव
दुत्तरपक्षाग्राणि बहिर्भूतानि निरस्येत्॥ एकविंशासरिशिष्यंते॥ पुरुषायामा द्वात्रिंशत् षोडश्यो भवंति षोडश
भागेन चैकाना मुद्ध्यात्स्वन्त्रयोरेवं शि सरिशिष्यते॥ पक्षापाये पुरुषं निषप्यासे रवापां पुरुषं ते भिनो दं कुर्यानिनो दत्ता
त्रिं

Indira Gandhi National
Centre for the Arts

॥३४॥ चीनं पुरुषं नेमितो दंनिनोदयोर्नान्तां तावालिखेत् तस्य प्रनमनं॥ आत्मप्र मितं यो पुरुषमात्रं वेणुं नियम्य लेखा
यामेय पुरुषस्यांतेषु णोरंते लक्षणं कुर्यात्॥ तस्मात्पुरुषात्प्राचीनं वेणुं लोरवायामेव निपायां सेछिद्रे शेवं लक्षणं च
निदधनितोदयोरंतौ नाना आलिखेत्॥ अपरस्मान्निनोदादारभ्य अपरांता वालिखेत्॥ पूर्वस्मान्निता हाज्ञा
परस्य पर्वा नादिति॥ तस्य प्रनमनं॥ प्रकास्य वक्रता॥ एतेनोत्तरः पक्षो व्याख्यातः॥१८॥ उत्तरप्रनमने
व्येवं कुर्यात्॥ द्विपुरुषं पश्चादर्धपुरुषं पुरस्ताच्चतुर्भागोनः पुरुष आयामोष्टादशकरणे पार्श्वयोस्ताः पंचद
शपरिगृह्णातिनस्तु छं पश्चात्तिर्यङ्मानी द्विपुरु द्विपुरुषा॥ पुरस्तादर्धपुरुषा॥ पादोनपुरुषायामा पार्श्वयोरष्टादश
षोडशगाः करोतीह षाद्दशकरणी पार्श्वयोः॥ ताएताः पंचदशषोडशाः परिगृह्णाति॥ वक्यर्थपुरुषव्यासा पादो
नपुरुषायामा षट्करोतितस्याभितो हे चतुरश्रे समे सर्वतः पादोनपुरुषमात्रेना वक्षणयालिखेत्॥ एवैकमर्धेय
जेत्॥ शिष्टं प्रत्येकमर्धं पंचमं करोति॥ अर्धपंचममर्धपंचमं नवनवसु षट् क्षिप्ते पंचदशतत्पुच्छं॥ षोडशी चतु
तुर्भिः परिगृह्णीयात्॥ पुरुषस्य षोडशभागोतिक्वतिसा षोडशी॥ तां चतुर्भिः फलकैर्वक्ष्यमाणैः परिगृह्णीयात्॥
---येदितियावत्॥ अष्टमेन त्रिभिरष्टमैश्चतुर्थेन चतुर्थसविशेषेणेति॥ पुरुषस्याष्टमेन पंचदशांगुलेन त्रिभि
रष्टमैस्तेनेव त्रिगुणितेन पंचचत्वारिंशदंगुलेन चतुर्थेन पुरुषचतुर्भागेन त्रिंशदंगुलेन चतुर्थसविशेषेण चतुर्भा
॥३५॥

गसविशेषेण प्रमाणेन तृतीयेन वर्धयेदित्यादिना वर्धितेन द्विचत्वारिंशदंगुलेन चतुर्दशतिलयुक्तेन॥ एवमेतैश्चतु
र्भिः कारिता षोडशी॥ आधेष्टकां त्रिभिः॥ परिगृह्णीयादिति सर्वत्र शेषः॥ द्वाभ्यां चतुर्थाभ्यां चतुर्थाभ्यां चतुर्थसवि
शेषेणेति॥ त्रिंशदंगुलाभ्यां सविशेषेणोक्तप्रमाणेन॥ एतैस्त्रिभिः कारयेत्॥ पादेष्टकां त्रिभिः॥ गतं॥ चतुर्थेनैकं
चतुर्थसविशेषाभ्यां चेति॥ चतुर्थेनैकं॥ चतुर्थस्य सविशेषश्चतुर्थसविशेषः॥ तस्यार्धाभ्यां चेति॥ पक्षेष्टकां
चतुर्भिः॥ पक्षार्थमिष्टका पक्षेष्टका॥ तां चतुर्भिः परिगृह्णीयात्॥ द्वाभ्यां चतुर्थाभ्यां २ सप्तमाभ्यां चेति॥ द्वाभ्यां च
चतुर्भिः॥ पक्षमध्यीयां चतुर्भिः॥ गतं॥ द्वाभ्यां चतुर्थाभ्यां द्विसप्त
तुर्थाभ्यां पुरुषसप्तमाभ्यां चास्यनमनमुपरिष्टाद्वक्ष्यति॥ पक्षमध्यीयां चतुर्भिः॥ गतं॥ द्वाभ्यां चतुर्थाभ्यां द्विसप्त
माभ्यां चेति॥ चतुर्थ-- सप्तमाभ्यां वक्रीभूताभ्यां मिसितैश्चतुर्भिः पक्षमध्यीयां करोति॥ पक्षाग्रीयां त्रिभिः॥
गतं॥ चतुर्थेनैकं चतुर्थसप्तमाभ्यामेकं चतुर्थसविशेषसप्तमाभ्यां चेति॥ पुरुषचतुर्थेनैकं॥ चतुर्थसप्तमाभ्यां
वक्रीभूताभ्यामेकं॥ चतुर्थसविशेषसप्तमाभ्यां वक्रीभूताभ्यामेव॥ पक्षकरण्याः सप्तमं तिर्यङ्मानी पुरुषचतु
र्थं च पार्श्वमानी तस्याक्ष्णयारज्ज्वा करणं प्रजं भयेत्॥ विपर्यस्तनयनेनेति॥ करणपक्षस्य करणी पक्षकरणी
इष्टका॥ तस्याः उक्तं करणं पुरुषसप्तमं तिर्यङ्मानी पुरुषचतुर्थं च पार्श्वमानीति पक्षेष्टकां चतुर्भिरित्तितमेव
दीर्घभूतं करणं प्रजं भयेत्॥ दीर्घयेत्॥ कर्णं॥ एकयाक्ष्णयारज्ज्वा--पनया दीर्घं कुर्यात् करणं॥ पक्षनमनाः

रु



Indira Gandhi National Centre for the Arts

॥३५॥ सप्तमे नपलकानिनमयेत्॥ पक्षनमनीतिनिनोदनले खामूलयोरंतरालं तत्समधा विभज्यैकेन भागेनत
मुन्नं भवतिया वत्प्रजं भिनेन तस्याः सप्तमीतिर्दं भवति॥ भवत्प्रजं भयेदिति॥ एवं यथा भवति तथा पल
कानिनमयेत्॥ गतं नमनं कुर्यात्॥ पक्षनमनीसा पक्षाणामध्ये चमेव॥ तत्र श्लोकः॥ तिलैः षोडशभिर्न
कानिनमयेत्॥ उपधाने चतस्रः पादेष्टकाः पुर
तं तिर्यक् स्यात् षोडशांगुलं॥ तथा तथा चतुर्थ्यां सप्तमाभ्यां च वामयेत्॥ उपधाने चतस्रः पादेष्टकाः पुर
स्ताच्छिरसि॥ उपध्यादिति शेषः॥ पुरस्ताच्छिरसि घोणा कारेष्टकाः॥ तस्याः पश्चात्तिस्रः॥ अपरेण शिरसो
ऽपयं पंच॥ कर्णाभरणवत्॥ पादेष्टकाएव॥ पूर्वेण पक्षाप्ययावेकादश॥ आत्मनि पक्षाप्ययोः पुरस्ता
देकादश॥ अपरेणैकादश॥ अपरेण पुच्छाप्ययावेकादशता एव॥ पूर्वेण पुच्छाप्ययं पंच॥ पंचापरेण पुच्छ
स्याप्ययस्य पुरस्तात् पंच पंच॥ पंचदश पुच्छाग्रे॥ १६॥ पुच्छाग्रे पंचदशता एव॥ एता षट्पंचाशत् पादेष्टकाः॥
चतस्रश्चतस्रः पक्षाग्रीयाः पक्षाग्रयोः पक्षाप्ययपयोश्च विशयास्ता आत्मनि चतसृभिः षोडशीभिर्यथा
योगं पर्युपदध्यात्॥ विपर्यस्य कारिता उत्तरे पक्षे पक्षाप्ययपयोश्च विशयास्ता आत्मनि चतसृभिः षोडशीभि
र्यथा योगं पर्युपदध्यात्॥ विपर्यस्य कारिता उत्तरे पक्षाप्ययपयोश्च विशयाः॥ चतस्रश्चतस्रो विशयाः पक्ष
सव्योर्दक्षिण पक्षाप्यये विपर्यस्य कारिताः॥ उत्तर पक्षेष्टकामात्रं तादृशीति विशयाः प्रसवस्य शंते॥ आत्मनि च ॥३५॥

तसृभिश्चतसृभिः षोडशीभिर्विपर्यस्य कारिताः दक्षिणपक्षाप्ययस्थाय थातेगनेन थाच तसृभिरुपदध्यात्॥ त
था चतसृभिरुत्तरपक्षाप्ययस्थाः॥ प्रतीयस्मिन्नर्थे परिशब्दः॥ चतस्रश्चतस्रः पक्षमध्यीयाः पक्षमध्ययोः प
क्षमध्ये भवा वक्री भूताश्चतस्रो दक्षिणे पक्षमध्ये चतस्र एवोत्तरपक्षमध्ये॥ पक्षेष्टकाभिः पक्षौ प्रच्छादयेत्॥
पदेपदे यथा उक्त लक्षणास्ताभिः प्रागायताभिः पक्षौ प्रच्छादये॥ पक्षयोरुपदध्यात्॥ विपर्यस्य कारितास्तासि
शत्॥ अवशिष्टं षोडशीभिः प्रच्छादयेत्॥ शिष्टमपि क्षेत्रं षोडशीभिरुपदध्यात्॥ अंस्या वा ह्यविशेषाः॥ अंते
भवा अंस्याः॥ अंसं तस्याः नावाह्यविशेषाः॥ अन्यत्र शिरसः॥ शिरसि वर्जयित्वा॥ आत्मनि मध्ये प्राच्य आत्म
निरीत यः रीतिद्वयं वशिष्टं पुच्छेनासु यदि षोडशीभिरेवोपधीयते संख्या पूर्येत किंतु भिद्यते चतुर्थ रीतिषु भेद
स्ववर्जनीयः॥ तस्मादन्याश्चोपधेयाः॥ कथमन्या उपधीयते नामुच्यमानाः इत्थ एव यच्चतुरश्रं त्र्यश्रिर्वा सं
पद्यते नैर्ऋ॥ अर्धेष्टकाभिः पादेष्टकाभिर्वा प्रच्छादयेदित्यवदता॥ ननु यथा चोपधीयंते अतिरिच्यंते संख्याने
षदोषः॥ उनाधिकप्रस्तार इसकं पूर्वस्मिन्यादृते॥ पुच्छेरीतिद्वयं तिस्रस्तिस्रो धेष्टकाः उपधाय षोडश्यः पुन
श्चोत्तरे पार्श्वे एकैकार्धः॥ एवमात्मनि द्वयोरीत्योर्दक्षिणतस्तिस्रोऽर्धेष्टकाः ततो द्वे षोडश्यौ॥ एकैकोर्धः शिरसि॥

॥३६॥ तिर्यक् द्वे षोडश्यौ॥ एवमष्टोत्तरं शतद्वयं॥ अपरास्मिन् प्रस्तारे पुरस्ताच्छिरसि द्वे षोडश्यौ बाह्यविशेषे उपदध्यात्॥
शिरसः पूर्वभागे द्वे षोडश्यौ बाह्यतः सविशेषे घोणाकारे उपदध्यात्॥ विपर्यस्तकारिणा दक्षिणतः॥ ते चापरे
ण द्वे विशये भ्यंतरविशेषे॥ ताभ्यां पश्चादात्मन्यर्धेष्टकामात्रे शिरसि॥ द्वाभ्यामर्धेष्टकाभ्यां यथायोगं पर्युप
ध्यात्॥ अभितोपयापुच्छनेतयोपदध्यात्॥ चतस्र एता विशयाः॥ बाह्यविशेषाभ्यां परिगृह्णीयात्॥ उभय
त्रत नीपापदस्र वणात्॥ विपर्यंतरमेतत् पूर्वयोर्विशेषणं च शब्दो व्याहर्तव्यः॥ बाह्यविशेषाभ्यां चेति॥ बा
ह्यविशेषा वा चार्धेष्टकाभ्यां परिगृह्णीयात्॥ शिरस्य नवकाशादात्मन्येव॥ आत्मकरणीनां संधिषु षोड
श्यो बाह्यविशेषा उपदध्यात्॥ आत्मनः करण्य आत्मकरण्यः तासां संधिषु श्रोण्यंसेषु चतस्रः षोडश्यो बा
ह्यविशेषाः प्रत्यग्विशेषाः॥ चतस्रश्चतस्रोर्धेष्टकाः पक्षाग्रयोः॥ तत्रवाकारे द्वे अर्धेष्टकाश्चोपधेयाः श्चतस्र
श्चतस्रः॥ पक्षेष्टकाभिरुदीचीभिः पक्षौ प्रच्छादयेत्॥ उदगायताभिः पक्षयोरुपदध्यात्॥ षट्पंचाशद्विपर्य
स्यकारिताः॥ तिस्रस्तिस्रोर्धेष्टकाः पुच्छपार्श्वयोः॥ तिस्रस्तिस्रोर्धेष्टकाः पुच्छपार्श्वयोर्बाह्यविशेषा॥ अ
वशिष्टं षोडशीभिः प्रच्छादयेत्॥ अवशिष्टमग्निक्षेत्रं षोडशीभिः प्रच्छादयेत्॥ अंसावाह्यविशेषा॥ गत
मेतत्॥ अन्यत्र पुच्छात्॥ पुच्छं वर्जयित्वा॥ यच्चतुरस्रं त्र्यश्रिर्वा संपद्येतार्धेष्टकाभिः पादेष्टकाभिर्वा प्रच्छादयेत्॥ ॥३७॥

यत्र षोडश्य एव शोते यदि तथा प्रक्षिप्येरन् भिद्यन्ते सर्वत्र अतो भेदपरिहाराय यत्नेन क्रियमाणे त्रिकोणं चतुरस्रं
वा प्रकारद्वयं संपद्यते पूर्वस्मिन् प्रस्तारे चतुरस्रं संपद्यते॥ त्रिकोणं वा॥ इह तु त्रिकोणमेव॥ तत्रार्धेष्टकाभिः पा
देष्टकाभिर्वा प्रच्छादयेत् उपदध्यात्॥ पुच्छाप्यये चतस्रो विशयाः॥ प्राच्यौ द्वे प्रतीच्यौ द्वे तासां पंचदश षोडश्यः ति
र्यक् पुच्छेपि विशयानां अभितो द्वाव -- तास्मिन्नितारां पुरस्ताच्चतस्रोर्धेष्टकाः॥ तासां चतस्रश्चतस्रः षोड
श्यः प्रतीच्यस्ताभिः प्रत्यर्पिताः तासां पुरस्ताद्द्वे षोडश्यौ नाग्रे प्रतीच्यौ तत्पार्श्वयोः॥ द्वावर्धौ आत्मन्यर्धपादेष्ट
कामात्रे आत्मनि द्वावर्धौ विशयावभितमर्धषोडश्येय॥ दक्षिणतो॥ एवं द्वादशोत्तरं शतद्वयं॥ इह केचिद्दीर्घायुषः
-मतादस्य स्वमनीषिकया करणं नरमुसाध्यसंख्यापूरणमेवं कुर्वंति॥ किं नामैतेषामशक्यं॥ वपंतु सूत्रकार
मतानुसारिणो नूनं न गृह्णीमः॥ अणूकाः पंचदशभागीयानां स्थाने॥ स्थानशब्दः प्रयोगवाची॥ अणू
काश्चतुर्भागीयाः संख्यापूरणे चोदिताः॥ पंचदशभागीयाश्चतुर्भागीयाश्च संख्यापूरणे चोदिता इती यावत्॥
अस्मिन्प्रस्तारे संख्या न पूर्यते॥ सूत्रकारेण तत्रताभिः संख्यापूरयितव्या॥ यदि ताभिः पूर्यते अस्मिन् तत्रैता
वता शक्यते॥ अणूकादिभिः संख्यापूरणं शक्यते न तु प्रकृतौ॥ तस्मादस्य पर्यायोगः॥ तत्र शक्यते द्वितीयप्रस्ता

॥३७॥ रेताभिः पूरयितुं॥ तत्र द्विशतपूरणमवश्यं कर्तव्यं॥ प्रतिप्रस्तारं पूरयेदिति वचनात्॥ तु सहस्रसंख्येव पूरयित
व्येत्युक्तं पूर्वस्मिन्पटले॥ तस्मात्त्र रूपयोर्योगः॥ तत्र श्लोकाः॥ पक्षेष्टकानां करणं विपर्यस्यार्धमिष्यते॥ पक्षा
ग्रीयास्तथैवार्धं विपर्यस्यैव कारयेत्॥ विपर्यस्यैव कर्तव्याः षोडश्यः षोडशीद्वयं॥ साहस्रेपि साहस्रे पंचष
ष्टिं विदुर्बुधाः॥ उपधाने यथा सूत्रे यथा चात्मनि पक्षयोः॥ पुच्छे शिरसि शिष्टे च षोडशीनां विदुर्बुधाः॥ विधि
मैवेत्॥ षट् प्राच्यः षट् प्रतीच्यश्च आत्मनि द्वादश क्षिपेत्॥ शीर्षे द्वयं क्षिपेन्नीर्य गुच्छात्तनाश्च तु र्दश॥ शिखरी
तित्रयं पुच्छे तथा चात्मन्यपि द्वयं॥ पक्षोप्ययेतु विशयाश्च तत्र षोडशीः क्षिपेत्॥ षोडशा वप्यये प्राच्येतेने
॥ ये शिरसि क्षिपेत्॥ मध्ये तयोश्च — वर्योश्चतस्रो विशयाः क्षिपेत्॥ आत्मन्येव द्वावव्यौ षोडश्यौ शिरसि क्षिपे
त् — — — — — — सूत्रं द्वादशोनशतद्वयं॥ आत्मनो दक्षिणे पार्श्वे चतस्रो दक्षिणायताः॥ द्वितीये चोत्तरे पार्श्वे
षड् द्वे श्रोण्यंसयोरपि शिरस्त्वाप्यये चैका शिरस्यधि च दक्षिणा॥ एतानि ध्येयाः षोडश्यो विपर्यस्तास्तरे द्वये॥
व्यस्तासंचितु यावत्तः प्रस्तारा — क्षिकीर्तित॥ गतं॥ २०॥ कंकचिदलजचिदिति श्येनचिताव्याख्यातो॥
कंकः पक्षिविशेषः॥ अलज श्च कंकश्च चेतव्यः कंकचित्॥ अलज इव चेतव्यः अलजचित्॥ तौ श्येनचितावा
॥३७॥

ख्यातौ॥ पूर्वेण श्येनेन व्याख्यातौ॥ मुख्यत्वाद्द्विशतप्रस्तारत्वाच्च॥ सैवाकृतिः॥ तान्येव करणानि॥ स एवोपधान
मार्गः॥ संकल्प एव भेदः॥ श्येनो लजः कंक इति॥ एवमिव हि श्येनस्य यथा ... सौपर्णो पुच्छाद्वक्रोऽस्त्रंबपु
रूं दीर्घ आत्मा मंडलः शिरश्च॥ हि शब्दः प्रसिद्धो॥ श्येनोप्येवमेव॥ वर्षीयान्सोवहं तौ पक्षौ कस्मात्पुच्छात्ती
चौ न केवलं बहतौ किं तु ताव्येवक्रौ संनतं संम्यक् नतं आत्मसमीपे कृशीयसः अग्नेर्व्यस्तः पक्षुत — — —
मुच्यते नत संन्नत इति॥ दीर्घ आत्मा न समचतुरस्रः॥ अमंडलः नापि दीर्घचतुरस्रः॥ अमंडल इव दीर्घच
तुरस्रः॥ अमंडल इव दीर्घचतुरस्र अतः शिर एवं प्रकारो लोके श्येन एवमेवं कंकालजौ लोके॥ तस्माच्छ्रुति
सामर्थ्यात्॥ तस्मात्तदाकारावेव कंकालजौ तेनैव व्याख्यातौ श्रुतिसामर्थ्यात्॥ सामर्थ्यमभिधानशक्तिः
॥ तावदेव श्रुत्याभिधीयते॥ अशक्यात्तु सर्वसंपादनस्य न ह्यशक्यमीपमर्थं वेदो विदधाति॥ अशिरस्कौ वा
॥ वाशब्दः पक्षव्यावृत्तौ॥ अशिरस्कावेव चेतव्यः॥ कुत इत्याह॥ अनाम्नानात्॥ नहि शिर आम्नायते॥ तस्य
कथमनाम्नानमित्यत्राह॥ विज्ञायते च कंचित् शीर्षण्वंतं चिन्वीत यः कामयेत सशीर्षामुष्मिंल्लोके सं
भवेयामिति विद्यमानेकथं ब्रूयात्॥ यदि शिर आम्नानमस्ति शीर्षण्वंतं चिन्वीतेति कथं ब्रूयादेवेत्यत्र यदि शिर

॥३८॥ आम्नानमस्तितदपुच्छनएवैतद्विशेषणं॥इतरथाविशेषणमनर्थकमेवस्यात्॥तस्माद्दशिरस्कएवचेतव्यः॥
यद्यशिरस्कः क्रमाकारः सइस्तत्राह॥प्राकृतौवक्रौपक्षौसन्नतंपुच्छंविकारश्रवणात्॥प्रकृत्याभवौप्राकृतौ
॥तावेवपक्षौवक्रीकर्तव्यौ॥कुतः विकारश्रवणात्॥सन्नतंपुच्छं॥पुच्छंचसन्नतंकर्तव्यं॥वक्रपक्षोव्यस्त
पुच्छइतिविकारः श्रूयते॥पक्षपुच्छानांवक्रतान्यस्तताचप्रकृतौनास्ति॥तस्माद्विकारत्वंपक्षपुच्छानां॥
यथाप्रकृत्यात्मा॥कुतः॥अविकारात्॥नहितत्रविकारः श्रूयते॥तस्मात्प्रकृतिवदेवात्माचतुःपुरुषः॥
अरत्निनार्धप्रादेशेनचापक्षौविवर्धयेत्॥द्विपुरुषांरज्जुमित्यादिश्येनवत्प्रकृतावरत्निनावर्धयेदिति
उक्तंवि[illegible]मिदमुच्यते॥अरत्निनाप्रादेशेनचेति॥उच्यते॥अरत्निवार्धविकारत्वप्रतिपादनपरंनपक्ष
पुच्छानांतावन्मात्रतामापादयितुं॥आत्मनश्चतुर्थश्चतुर्भागीयाश्चाष्टाविंशत्युपादानव्यमितिश्येनप्रति
पादनंकर्तव्यंयथाप्रकृत्यैवात्मावर्तव्यः॥किंचप्राकृतंपुच्छमितिवचनाच्चउपधानविधिश्चनघटते
इतिएवंतुत्रियमाणेप्रथमद्वितीयानामेवविकारः॥तेनान्येषामितियथाचतुर्थ्यादयोपिविकृताभवेयुः
तथाश्चवर्तव्याभवेयुःतस्याश्चकरणानुप्रवेशेनचेनव्यदंसु[illegible]॥श्येनवदेवपुच्छं॥करणान्युच्यंते॥चतु ॥३८॥

र्थपष्ठाभ्यां यथायोगंतत्प्रथमं॥तेद्वेपूर्ववत्संहितेतद्वितीयमित्यादितथोपधानविधिरष्टाचत्वारिंशदश्च
यमाउदीचीः पक्षयोः श्येनवत्॥पुच्छमात्मानश्रोण्योक्तिस्रःस्तिस्रः पंचम्योक्ष्णयाभिंद्यात्॥अष्टौषष्ठ्यः
संपद्यंते॥एषद्विशतः प्रस्तारः॥अपरस्मिन्प्रस्तारेचतस्रश्चतस्रोर्द्वितीयानिर्णामयोरप्ययोश्चविश
यास्ततीयाश्चतस्रश्चतस्रपु[illegible]वदष्टधागोपेताः॥पक्षेष्टकाभिः प्राचीभिः पक्षौप्रच्छादयेत्तद्वासप्ततिः
पुच्छेश्येनवत्सप्तषष्टमौहिश्रोण्यसेषुद्वेद्वेपंचम्योप्राचीः प्रतीचीश्चप्राच्यानवरीतयः चतुर्थीभिस्ततीः
पुच्छेश्येनवत्सप्तषष्टमौहिश्रोण्यसेषुद्वेद्वेपंचम्यौप्राचीः प्रतीचीश्चप्राच्यानवरीतयः चतुर्थीभिस्तती
यपंचम्यौरीत्योर्मध्येत्रिंशत्षष्ठ्यः एकाचपंचमी एकत्रषोडशपरत्रचतुर्दश॥एवंद्विशतः प्रस्तारः॥अ
यवासएवानुपुच्छमर्धपुरुषव्याससप्रादेशंपुरुषंप्रतीचीनमायच्छेत्॥तस्यदक्षिणतोन्यभित्यादिनाश्येनव
त्पुच्छंकुर्यात्॥पक्षौप्राकृतावेवद्विपुरुषायामौ॥करणानिवक्ष्यामः तद्वादशांगुलंयथाभवतितथातिर्यक्
चतुर्थपष्ठाभ्यांनमयेत्॥प्रथमंततनुतेएवसंहितेयथादृष्टांतः॥तत्रकारयेत्॥द्वितीयतृतीयमपिपंचभा
गेनाष्टभागेनवा[illegible]र्धयेदितिचतुर्थादीनितएववापुच्छचतुर्थंत्रयस्त्रिंशदंगुलविस्तारंपंचचत्वारिंशदंगुला
यामंचतुर्दशतिलेरूनंसविशेषपंचममर्धसप्तदशांगुलव्यासंषष्ठस्यपार्श्वत्रयस्त्रिंशत्कर्णेषट्त्रिंशदंगु

॥३९॥ लमध्यमितिलै: सहसप्तमाष्टमयो: पार्श्वमेकेन त्रिंशद्ध्यायामस्तु षड्विंशत्यंगुलं चतुर्दशतिलै: सयुक्ता
पाययो: विशयो: विशयोरष्टादशांगुलं पुच्छे पंचदशांगुलमेव आत्मनि चतुर्थ्यादयो विकृता: पुच्छेनुप्रा
कृता एव आत्मन्युपधानविधि: स एव ॥ तत्र श्लोका: ॥ अर्धत्रयोदशव्यासमशिरस्केह विमुंजि ॥ तथा
चतुर्थषष्ठीभ्यां नमयेत्सप्तमं तु तत ॥ ते । द्वे सु संहिते प्राचीद्वितीयकरणं भवेत् ॥ तृतीयमपि षड्भागमष्टमा
गे न वर्धितं ॥ पक्षेष्टकाश्चतुर्थ्यास्यु पुच्छं पुच्छवदुच्यते ॥ षट्पंचाशच्चतुर्थ्या: स्यात्तिर्यगष्टादशायता:
॥ अष्टौ पुरस्तात्तिर्यक् च श्रोण्यो: षट् पंचमी क्षिपेत् ॥ श्रोण्योश्चतस्र: पंचम्यो मेदोवाह्नि नयस्तरे ॥ स्ये
नवसप्तपुच्छे पुनर्धायात्मन्यपि क्षिपेत् ॥ प्राच्यां चैव प्रतीच्यां च त्रिंशदेका च पंचमी ॥ ना सामेवोत्तरेषा
र्ध्यं चतुर्थ्या: षोडशाद्वयं ॥ प्राच्यां चैव प्रतीच्यां च तथा षोडश दक्षिणे ॥ प्राचीश्चैव प्रतीचीश्चावशिष्टोपं
चमी क्षिपेत् ॥ करणस्य विपर्यसं चतुर्थस्यैव नेष्यते ॥ स प्रादेशोपि वा पुच्छे विस्तारो द्वादशं भवेत् ॥ तथा
चतुर्थपष्ठाभ्यां नमयेत्सप्तमं तु तत ॥ ते द्वे सु संहिते प्राचीद्वितीयकरणं हितत् ॥ तृतीयमपि षड्भागमष्ट
भागे न वर्धितं ॥ द्वाविंशति द्विगुणितं तिलानां चापि विंशति: ॥ सविशेष चतुर्थस्य तिर्यक् तु त्र्यधिकं भ
वेत् ॥ पंचमं प्राकृतं विद्यात् षष्ठान्यविकृतास्त्रय: ॥ षष्ठस्य पार्श्वस्त्र्यधिकं करणं षट् ॥ इत्यग्नि: ॥ सप्तमा ॥३९॥

प मयो: पार्श्वमूनत्रिंशन्निहोच्यते ॥ आयामश्चापि षड्विंशच्चतुर्दशतिलै: सह ॥ चतुर्थ्यादयस्तु विकृता: पुच्छे
मेवात्मनि निक्षिपेत् ॥ अष्टादशांगुलं पुच्छे शय — — — दात्मनि ॥ यद्यप्येतच्छेनचितं चिन्वीतेति यावदाम्नातं सा
रूप्यं व्याख्यातं ॥ यत्र यावदाम्नानं सारूप्यं ग्रहीं जातिवाचकानां शब्दानां किमपि सामान्यमेव प्रवृत्तिनिमि
त्तं दृश्यते यथा गौर्वाहीक इति एवमत्रापि यावदाम्नानमेव सारूप्यमगपिला: येन शब्देचतं तेन चनुसारू
प्यं व्याख्यातं वक्रपक्षं इत्यादिना ॥ त्रिस्तावो ग्निर्भवतीत्यश्वमेधे विज्ञायते नेत्तरस्यां भ्यासो विशेषात् ॥ न
त्रसारत्नि प्रादेशस्य सप्तविधस्याभ्यास: ॥ कुत: अविशेषात् ॥ न हि विश्वद्विशेषोत्राम्नायते ॥ तस्मात्सर्व
स्यावृत्ति: ॥ दीर्घचतुरश्राणां समासेन पक्षपुच्छानां समास उक्त: ॥ दीर्घचतुरश्रात्मपक्षपुच्छानां
समासविधिरुक्त: यदन्यत्समभ्य इत्यादिना ॥ विधासमसकरणीमित्यादिना वा ॥ वेणुत्रिकरण्यावावि
कृदेदि सर्प: ॥ एकविंशो ग्निर्भवतीत्यश्वमेधे विज्ञायते ॥ गतमेतत् ॥ तत्र पुरुषाभ्यासो नारत्नि प्रादेशा
नां संख्यासंयोगात्संख्यासंयोगात् ॥ तत्र पुरुषाभ्यास: नारत्निप्रादेशानां ॥ कुत: संख्यासंयोगात् ॥ च
एकविंशाइति ॥ ननु सप्तविध इत्यत्रापि संख्यैव विधीयते ॥ वाक्यान्तरेणत्रारत्निप्रादेशाभिविशते ॥ न

Indira Gandhi National
Centre for the Arts

३२०

॥४०॥ नत्रससंख्यासंयोगः॥ पुरुषाभ्यास एव॥ नास्ति प्रादेशानां तत्र श्लोकः॥ विधेनरः प्रोक्ता विस्ताव
तिविभावसोः॥ एवं विशेतनोन्यूनं तिसानाचैव सप्ततिः॥ द्विहस्तिर्मंगलाप्यी॥ ॥ षष्ठः पटलः॥
॥६॥ ॥ इत्यापस्तंबीयशुल्बभाष्यं कपर्दीस्वामिकृतं समाप्तं॥ ॥६॥ ॥ मितिमाघकृष्णपंचमी॥



Indira Gandhi National Centre for the Arts